# संस्कृत - मन्दाकिनी

Based on New Paper Pattern of Maharashtra State Board



STD. X

ENG. MED. (ENTIRE)

Maithilee Potnis
M.A. (Sanskrit)

Target Publications Pvt. Ltd.

Based on New Paper Pattern of Maharashtra State Board of Secondary and Higher Secondary Education, Pune.

# Std. X

# संस्कृत - मन्दाकिनी

**(For Sanskrit Entire Course)**

**Salient Features :**

- Coverage of Entire Syllabus in Activity Based Format
- Adequate Activities based on Vocabulary and Grammar
- Appropriate Translations of all the Lessons and Poems
- Separate Section on Writing Skills

Printed at: **Jasmine Art Printers Pvt. Ltd,** Navi Mumbai

© *Target Publications Pvt. Ltd.*
*No part of this book may be reproduced or transmitted in any form or by any means, C.D. ROM/Audio Video Cassettes or electronic, mechanical including photocopying; recording or by any information storage and retrieval system without permission in writing from the Publisher.*

P.O. No. 22856

**10185_10750_JUP**

# PREFACE

Whenever you read a good book, somewhere in the world a door opens to allow in more light.

**– Vera Nazarian.**

Sanskrit is a language, so ancient and so full of history that it lies at the heart of India. It is in the very ebb and flow of Hinduism and Buddhism, old and culturally rich religions. Most Indian languages have their roots buried deep in Sanskrit. Upheld as the language of Gods, Sanskrit transcends and persists throughout history.

There is a popular belief, however, that Sanskrit is a challenging language to master. If you manage to overlook this, you will see the beauty of this historical language. Through **Target Publication's Std. X: Sanskrit-Mandakini**, based on Maharashtra State Board's new paper pattern, I have tried to ease the mammoth task of learing Sanskrit. It is critically analysed and extensively drafted to boost the student's confidence.

The book is divided into six parts keeping in mind the new paper pattern. The textual extracts have been carefully translated and explained. A range of all possible questions concerning the text have been constructed and duly answered. This book comprises of extensive notes on all the sections of the new paper pattern. These notes are meticulously structured so that they cover every aspect of a question, providing students with answers to any type of question frameable. The book also includes लेखनकौशलम् (Essays, Kathapurti, etc.) and अपठितम्-अनुवादकौशलम् (Unseen Translations). Moreover, this book efficiently deals with sizeable explanations of complex textual matter.

I express my deepest gratitude to **I.E.S. Sanskrit Kendra, Dadar** for their support and cooperation.

I'm thankful for the valuable insights of my ex co-author **Vidnyapana Gokarnakar** and **Shreehari Gokarnakar**. I am greatly indebted to **Mrs. Ashwini Damle** for her exemplary support in the making of this book. This book would not have come into being without her constant and unwavering assistance.

I also owe thanks to **Mrs. Tarangini Khot** for her moral support, encouragement and constructive guidance in the preparation of this book. She has bestowed all her knowledge in making this book preeminent.

And finally, I am thankful to all my dear students, who are my true inspiration for teaching Sanskrit.

*A book affects eternity; one can never tell where its influence stops.*

*Best of luck to all the aspirants!*

Author,
Maithilee Potnis

# कृतिपत्रिकायाः प्रारूपम्

**अवधिः होरात्रयम्।** **गुणा : 80**

**प्रथमः विभागः- गद्यम्।**

**(अवबोधनम्, शब्दसम्पत्तिः, पृथक्करणम्)**

**प्रश्न 1. अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

अ 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2

(100-120 शब्दपरिमितः गद्यांशः।)

अ 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

अ 3. स्वमतप्रकटनं माध्यमभाषया। 2

**प्रश्न 1. ब. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

ब 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2

(100-120 शब्दपरिमितः गद्यांशः।)

ब 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

ब 3. पृथक्करणम्। (केवलं क्रमसंयोजनम्।) 2

**प्रश्न 1. क. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

क 1. अवबोधनम्। (केऽपि 2 कृती कुरुत।) 2

(100-120 शब्दपरिमितः गद्यांशः।)

क 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।) 3

क 3. पृथक्करणम्। (वृक्षरेखाचित्रम् /जालरेखाचित्रम् / स्तम्भपूरणम्।) 2

**अवबोधनस्य कृतयः** i, ii, iii कृतयः प्रष्टव्याः।

i. उचितं पर्यायं / कारणं चित्वा वाक्यं पुनर्लिखत।

ii. कः कं वदति। / पूर्णवाक्येन उत्तरं लिखत।

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं / योग्यं वा अयोग्यं लिखत।

**शब्दज्ञानस्य कृतयः** i, ii, iii, iv कृतयः प्रष्टव्याः।

i. सन्धिविग्रहः।

कृतयः - चतुर्थपदं लिखत / पूर्वपदं लिखत / उत्तरपदं लिखत। उचितं पर्यायं चित्वा लिखत।

ii. पर्यायशब्दाः / विलोमशब्दाः / भिन्नार्थकशब्दाः।

कृतयः - चयनम् / मेलनम् / समूहेतरपदस्य / चतुर्थपदस्य लेखनम्।

iii. विशेषण - विशेष्य - अन्वितिः।

कृतयः - चयनम् / मेलनम् / चतुर्थपदस्य लेखनम्।

iv. धातुसाधित - अव्ययानां (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।

## द्वितीयः विभागः- पद्यम्।

## (पृथक्करणं, स्पष्टीकरणं, शब्दसम्पत्तिः, अन्वयपूर्तिः, स्मरणं, वृत्तज्ञानम्।)

**प्रश्न 2.अ. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

अ 1. पृथक्करणम्। (वृक्षरेखाचित्रम् / जालरेखाचित्रम् / स्तम्भपूरणम्।) 2

(6-8 पङ्क्तिपरिमितः पद्यांशः।)

अ 2. तात्पर्यलेखनम् / स्पष्टीकरणम्। 2

**प्रश्न 2. ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

ब 1. शब्दज्ञानम्। 2

(6-8 पङ्क्तिपरिमितः पद्यांशः।)

ब 2. अन्वयपूर्तिः। 2

**प्रश्न 2. क. स्मरणम्** – श्लोकलेखनम्। (केवलं 2) 4

**प्रश्न 2. ड. वृत्तज्ञानम्।** 1

**स्पष्टीकरणम्** – पद्यांशस्य मध्यवर्तिकल्पनां / संकल्पनां माध्यमभाषया स्पष्टं कुरुत।

**अन्वयपूर्तिः** – अन्वये विद्यमानानि चत्वारि रिक्तस्थानानि श्लोकतः शब्दान् चित्वा पूरयत।

**शब्दज्ञानस्य कृतयः** i, ii एकैकगुणस्य कृते प्रष्टव्ये।

i. पर्यायशब्दौ / विलोमशब्दौ / भिन्नार्थकशब्दौ।

कृतयः - चयनम् / मेलनम् / समूहेतरपदस्य / चतुर्थपदस्य लेखनम्।

ii. विशेषण - विशेष्य-अन्वितिः।

कृतयः - चयनम् / मेलनम् / चतुर्थपदस्य लेखनम्।

**स्मरणम्** - 3 पर्यायेषु 2 श्लोकौ शुद्धौ पूर्णौ लेखनीयौ।

**वृत्तज्ञानम्** - वृत्तनाम चित्वा लेखनीयम्।

## तृतीयः विभागः- स्थूल वाचनम्।

## (गद्यम्/पद्यम् – अवबोधनम्, पृथक्करणम्)

## (80-120 शब्दपरिमितः एकः गद्यांशः वा 16-18 पङ्क्तिपरिमितः एकः पद्यांशः।)

**प्रश्न 3. गद्यांशं / पद्यांशं पठित्वा निर्दिष्टाः कृती कुरुत।**

3. अ अवबोधनम्।

कृतीः i. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं / योग्यं वा अयोग्यं लिखत। 1

ii. एकपदेन उत्तरं लिखत। 1

3. ब. पृथक्करणम् – कृतयः - वृक्षरेखाचित्रम् / जालरेखाचित्रम् / मेलनम् (शब्दानाम् / श्लोकांशानाम्।) 2

## चतुर्थः विभागः- लेखनकौशलम्।

**प्रश्न. 4 यथानिर्देशं कृतीः कुरुत। (केवलं 3 उपप्रश्नाः लेखनीयाः।)**

अ. कथापूर्तिः / परिच्छेदपूर्तिः-

मञ्जूषातः उचितान् शब्दान् चित्वा 5 रिक्तस्थानानि पूरयित्वा कथां / परिच्छेदं पुनर्लिखत। (परिशिष्टम् 6) 5

ब. निबन्धलेखनम् - 3 पर्यायेषु 1 विषयम् अधिकृत्य 5 वाक्यात्मकं निबन्धं लिखत। (परिशिष्टम् 7) 5

क. संस्कृतानुवादः - 8 वाक्येषु 5 वाक्यानां संस्कृतभाषया अनुवादं कुरुत। (परिशिष्टम् 2) 5

ड. वाक्यरचना - (परिशिष्टम् 1)

i. धातूनां प्रयोगः - 4 धातुषु 3 धातून् प्रयुज्य 3 वाक्यानि संस्कृतभाषया लिखत। 3

ii. अशुद्धिसंशोधनम् – अव्ययानि प्रयुज्य रचितेषु 4 वाक्येषु 2 वाक्ययोः अशुद्धिसंशोधनं कुरुत। 2

## पञ्चमः विभागः- व्याकरणम् – उपयोजनकौशलम्।

**प्रश्न. 5 यथानिर्देशं कृतीः कुरुत।** (केवलं 5 उपप्रश्नाः लेखनीयाः।)

अ. क्रियापदरूपैः आवलिपूरणम्। (8 पर्यायेषु 6 पर्यायाः लेखनीयाः) 3

(प्राधान्येन दशमीकक्षायाः कृते निर्धारितानां गणानां कालार्थरूपाणि तथा द्वितीयभविष्यत्कालस्य,परोक्षभूतकालस्य च रूपाणि।)

ब. नाम + सर्वनाम्नारूपैः आवलिपूरणम्। (8 पर्यायेषु 6 पर्यायाः लेखनीयाः) 3

(प्राधान्येन दशमीकक्षायाः कृते निर्धारितानि नामानि तथा एतत्, सर्व, अन्य, इदम्, अस्मद्, युष्मद् सर्वनामानि।)

क. धातुसाधितविशेषणानां पृथक्करणम्। (कोष्ठकपूर्तिः।) (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

(कर्त.भू.धा.वि., कर्म.भू.धा.वि., क.वि.धा.वि., व.का.धा.वि. – प्रथमाएकवचनस्य रूपाणि।)

(Past Active Participle, Past Passive Participle, Potnetial Passive Participle, Present Active Participle, Nominative singular forms)

ड. समासाः। - (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) 3

कृती-समस्तपदानां / विग्रहवाक्यानां समासनामभिः सह मेलनम् / कोष्ठकपूरणम्।

इ. वाक्यपरिवर्तनम्। (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) 3

i. प्रयोगपरिवर्तनम्। (Change the vocie)

ii. सतिसप्तमीरचना। (Absolute Locative)

iii. प्रयोजकरचना। (Causative Construction)

iv. त्वम् ↔ भवान् इति परिवर्तनम् । (interchange त्वम् ↔ भवान्)

फ. सङ्ख्यावाचकाः। (व्याकरणविवेचनम् 7) (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) 3

कृतिः- रिक्तस्थानपूर्तिः।

## षष्ठः विभागः- अनुवादकौशलम्।

**प्रश्न 6. यथानिर्देशं कृतीः कुरुत।**

अ. संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 3) 4

ब. संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 4) 4

क. संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (परिशिष्टम् 5) 4

# Contents


| क्र. | पाठः। | | पृष्ठ क्र. |
|---|---|---|---|
| | **प्रथमः विभागः गद्यम् अवबोधनम्।** | | |
| 1. | अनर्घाः षड् वैद्याः। | Story | 1 |
| 2. | ऊर्जासञ्चयः एव धनसञ्चयः। | (Dialogue) | 16 |
| 3. | शिल्पकारः करमरकरमहोदयः। | Informative | 29 |
| 4. | आत्मिकी सम्पद्। | Story | 46 |
| 5. | पक्षिमित्रा भवामः। | Informative | 63 |
| 6. | रसास्वादनम्। | (Dialogue) | 81 |
| 7. | ज्ञानकल्पवृक्षः। | Informative | 93 |
| 8. | अमूल्यं विद्यते सर्वम्। | Story | 105 |
| 9. | द्वे कथे – स्वामिविवेकानन्दस्य। | Story | 118 |
| | **द्वितीयः विभागः पद्यम् अवबोधनम्।** | | |
| 1. | सुभाषितमाला – 1। | (For recitation) | 134 |
| 2. | सिकतासेतुः। | | 143 |
| 3. | नमामि राष्ट्रध्वजम्। | | 154 |
| 4. | अन्त्याक्षरी। | (For recitation) | 162 |
| 5. | बुऱ्हाणपुरशिलालेखः। | | 170 |
| 6. | सुभाषितमाला – 2। | (For recitation) | 177 |
| | **तृतीयः विभागः स्थूलवाचनम् अवबोधनम्।** | | |
| 1. | कलानां प्रवरं चित्रम्। | (Rapid Reading) | 185 |
| 2. | संस्कृता वाक्-भारतीयसंस्कृतेर्मूलम्। | (Rapid Reading) | 190 |

| | | |
|---|---|---|
| | **चतुर्थः विभागः लेखनकौशलम्।** | |
| 1 | कथापूर्तिः। | 197 |
| 2. | निबन्धलेखनम्। | 199 |
| 3. | संस्कृतानुवादः। | 205 |
| 4. | वाक्यरचना। | |
| | A. धातूनां प्रयोगः। | 207 |
| | B. अव्ययानां प्रयोगः। | 209 |
| | **पञ्चमः विभागः व्याकरणम् उपयोजनकौशलम्।** | |
| 1 | Grammatical Explanations 1, 2 and 3-Exercises | 213 |
| 2. | क्रियापदानि। | |
| | A. परोक्ष-भूतकालः (Past Perfect Tense) | 216 |
| | B. द्वितीय-भविष्यकालः (Second Future Tense) | 217 |
| | C. च्वि रूपाणि। (च्वि - Forms) | 218 |
| | D. नामधातुः। (Nominal Root) | 219 |
| | E. Important forms appeared in the text book | 220 |
| | F. Table of Verb forms | 222 |
| 3. | समासाः। | 223 |
| 4. | सङ्ख्यालेखनम्। | 236 |
| 5. | वाक्यपरिवर्तनम्। | |
| | A. प्रयोगाः। (Voice) | 237 |
| | B. सति-सप्तमी । (Absolute Locative) | 241 |
| | C. प्रयोजकः। (Causal) | 242 |
| | **षष्ठः विभागः अपठितम्-अनुवादकौशलम्।** | |
| 1. | गद्यांशाः। | 244 |
| 2. | पद्यांशाः। | 252 |
| 3. | नाट्यांशाः। | 255 |
| 4. | प्रतिदर्श - कृतिपत्रिका | 260 |


**Note:**
- Questions of grammar like पदपरिचयः, समासपरिचयः, सूचनानुसारं परिवर्तनं कुरुत that fall in the पञ्चमः विभागः व्याकरणम् are included in the प्रथमः विभागः गद्यम्-अवबोधनम्. This helps students for quick reference of these words from the respective lessons.
- For the question श्लोकस्य तात्पर्यं/ स्पष्टीकरणं माध्यमभाषया लिखत students have the liberty to answer the question in their medium of education. Student can either use given translation to answer it.

# 01 अनर्घाः षड् वैद्याः।

## गद्यांशः - 1

**चन्द्रपुरनाम्नि नगरे.......................................................................................भक्षयित्वा सन्तुष्टोऽभवत्।**

**(words 115)**

चन्द्रपुरनाम्नि नगरे सोमशर्मा नाम **धनिकः + वणिग्** निवसति स्म।

A rich merchant named Somasharma used to stay in the city named Chandrapur.

तस्य नैके व्यवसायाः आसन्।

He had many trades.

उद्योगव्यग्रः **सः + गच्छता** कालेन **अस्वास्थ्यम् + अनुभवति** स्म।

Being engrossed in the work, over a period, he started feeling unhealthy.

नैके **उपचाराः + जाताः**, परं सर्वे विफलाः।

Many treatments were given but all were futile.

एकस्मिन् दिने तस्मै अनन्तभट्टवैद्यस्य विषये **केन + अपि** कथितम्।

One day, somebody told him about doctor Anantabhatta.

**ततः + तम् + आनेतुं** तेन धनिकेन सत्वरं सेवकः प्रेषितः।

Then, a servant was immediately sent by that rich man to bring him (Anantabhatta).

किन्तु सेवकेन आनीते सन्देशे **लिखितम् + आसीत्** , '**भवन्तम् + उपचरितुं सानन्दम् + इच्छामि।**

But it was written in the message brought by a servant, 'I would like to treat you with pleasure.

**तथा + अपि** मया मम नियमानां **पालनम् + अपेक्ष्यते।**

Still, I expect my rules to be followed.

**चिकित्साम् + अभिलषन्** रुग्णः **स्वयम् + एव** मम समीपे आगच्छतु।

Patient desiring treatment should come to me personally.

कृपया **सूर्योदयात् + अनन्तरं पद्भ्याम् + एव** आगच्छतु।'

After the Sunrise, please come on foot'.

**अनिच्छया + एव** अन्येद्युः सोमशर्मा अनन्तभट्टं प्रति **पद्भ्याम् + एव** गतवान्।

Next day, Somasharma unwillingly walked to Anantabhatta.

बालसूर्यस्य किरणेषु पद्भ्यां चलनेन प्रसन्नः सोमशर्मा, "कृपया, भवान् **सत्वरम् + उपचारं** करोतु।

By walking in the rays of early sun, being delighted, Somasharma said, "Could you please treat(me) immediately.

शीघ्रं गन्तव्यं मया," **इति + अवदत्।**

I have to go quickly."

**अनन्तभट्टः + अभाषत,** "भोः, भवान् प्रतिदिनं प्रभाते करणीयानि कार्याणि समाप्य उद्यानस्य निकटे **प्रवहतः + निर्झरस्य** जले स्नात्वा प्रत्यागच्छतु।"

Anantabhatta said, "Oh!, having completed daily morning ablutions come back after taking a bath in the water of the stream flowing near the garden."

**अनन्तभट्टस्य + आदेशेन** उद्विग्नः सोमशर्मा **तत् + स्थानं** गत्वा स्नानं कृतवान्।

Agitated due to the instructions of Anantabhatta, having gone to that place, Somasharma took a bath.

शुचिर्भूतः सोमशर्मा अनन्तभट्टस्य गृहं प्रत्यागतवान्।

Refreshed Somasharma returned to the house of Anantabhatta.

**ततः** + **तस्य** वैद्यस्य पत्न्या परिवेषितं **सात्त्विकम्** + **अल्पं** प्रातराशं भक्षयित्वा **सन्तुष्टः** + **अभवत्।**

Then he was contented, having eaten wholesome little breakfast served by the wife of that doctor.

## अवबोधनम्।

### A. एकवाक्येन उत्तरं लिखत।

*1. वैद्यस्य पत्न्या **किं** परिवेषितम्?

**Ans:** वैद्यस्य पत्न्या **सात्त्विकः अल्पः प्रातराशः परिवेषितः**।

*2. सोमशर्मा **कुत्र** निवसति स्म?

**Ans:** सोमशर्मा **चन्द्रपुरनाम्नि नगरे** निवसति स्म।

*3. सोमशर्मा अनन्तभट्टं प्रति **कथं** गतवान्?

**Ans:** सोमशर्मा अनन्तभट्टं प्रति **पद्भ्यामेव** गतवान्।

4. अन्येद्युः सोमशर्मा **कं** प्रति गतवान्?

**Ans:** अन्येद्युः सोमशर्मा **अनन्तभट्टं** प्रति गतवान्।

5. अनन्तभट्टस्य आदेशेन उद्विग्नः सोमशर्मा **किं** कृतवान्?

**Ans:** अनन्तभट्टस्य आदेशेन उद्विग्नः सोमशर्मा **तत्स्थानं गत्वा स्नानं** कृतवान्।

6. शुचिर्भूतः सोमशर्मा **कुत्र** प्रत्यागतवान्?

**Ans:** शुचिर्भूतः सोमशर्मा **अनन्तभट्टस्य गृहं** प्रत्यागतवान्।

7. चन्द्रपुरनाम्नि नगरे **कः** निवसति स्म?

**Ans:** चन्द्रपुरनाम्नि नगरे **सोमशर्मा** निवसति स्म ।

8. धनिकेन **कः** प्रेषितः?

**Ans:** धनिकेन **सेवकः** प्रेषितः।

9. वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा **कः** सन्तुष्टोऽभवत्?

**Ans:** वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा **सोमशर्मा** सन्तुष्टोऽभवत्।

### B. मञ्जूषातः योग्यं पर्यायं चित्वा रिक्तस्थानं पूरयत।

*1. रुग्णः स्वयमेव _______ समीपे आगच्छतु। (मम, मह्यम्, माम्)

**Ans:** रुग्णः स्वयमेव **मम** समीपे आगच्छतु।

*2. _______ निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु। (उद्याने, उद्यानात्, उद्यानस्य)

**Ans:** **उद्यानस्य** निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।

3. तस्य _______ व्यवसायाः आसन्। (नैकाः, नैके, नैकानि)

**Ans:** तस्य **नैके** व्यवसायाः आसन्।

4. कृपया _______ अनन्तरं पद्भ्यामेव आगच्छतु। (सूर्योदयम्, सूर्योदयात्, सूर्योदयस्य)

**Ans:** कृपया **सूर्योदयात्** अनन्तरं पद्भ्यामेव आगच्छतु।

### C. कः कं वदति? इति लिखत।

1. 'भवन्तमुपचरितुं सानन्दमिच्छामि।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति**।

2. 'शीघ्रं गन्तव्यं मया।'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति**।

3. 'निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति**।

### D. अधोनिर्दिष्टं वाक्यं सत्यं वा असत्यम् इति लिखत।

1. सोमशर्मा अस्वास्थ्यमनुभवति स्म।

**Ans:** **सत्यम्**।

2. तेन धनिकेन सत्वरं सन्देशः प्रेषितः।

**Ans:** **असत्यम्**।

3. सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान्।

**Ans:** **सत्यम्**।

### E. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

1. सोमशर्मा अस्वास्थ्यमनुभवति स्म। यतः _______ (सः वृद्धः जातः। / सः अतीव कार्यव्यग्रः आसीत्।)

**Ans:** सोमशर्मा अस्वास्थ्यमनुभवति स्म। यतः **सः अतीव कार्यव्यग्रः आसीत्।**

2. _______ धनिकेन सत्वरं सेवकः प्रेषितः। (अनन्तभट्टवैद्यम् आनेतुम् / फलानि आनेतुम्)

**Ans:** **अनन्तभट्टवैद्यम् आनेतुं** धनिकेन सत्वरं सेवकः प्रेषितः।

3. _______ सोमशर्मा सन्तुष्टोऽभवत्। (उद्यानं गत्वा / सात्त्विकमल्पं प्रातराशं भक्षयित्वा)

**Ans:** **सात्त्विकमल्पं प्रातराशं भक्षयित्वा** सोमशर्मा सन्तुष्टोऽभवत्।

## माध्यमभाषया उत्तरं लिखत।

1. सेवकेन आनीते सन्देशे किं लिखितम् आसीत्?

**Ans:** This extract is from the lesson **'अनर्घाः षड् वैद्याः।'** in which the importance of six naturally available precious doctors is described. If one pays attention to these

factors in routine life then he can easily keep the real doctor away.

A very rich merchant Somasharma who was always engrossed in work started feeling unhealthy. All the treatments were futile. As somebody told him about doctor Anantabhatta, he immediately sent a servent to bring the doctor. But instead of coming to Somasharma's house Anantabhatta sent him a message saying that he would like to treat Somasharma but he expects his rules to be followed. He also said that the patient desiring treatment should himself go to him after the sunrise and that he should walk to his house.

## क्रमसंयोजनम्।

**1. घटनाक्रमानुसारेण लिखत।**

i. तेन सेवकः प्रेषितः।
ii. तेन अनन्तभट्टस्य विषये ज्ञातम्।
iii. सेवकेन सन्देशः आनीतः।
iv. सोमशर्मा अस्वास्थ्यमनुभवति स्म।

**Ans:**
**i. सोमशर्मा अस्वास्थ्यमनुभवति स्म।**
**ii. तेन अनन्तभट्टस्य विषये ज्ञातम्।**
**iii. तेन सेवकः प्रेषितः।**
**iv. सेवकेन सन्देशः आनीतः।**

**2. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनर्लिखत।**

i. वैद्यस्य पत्न्या प्रातराशः परिवेषितः।
ii. शुचिर्भूतः सः अनन्तभट्टस्य गृहं प्रत्यागतवान्।
iii. सः अनन्तभट्टं प्रति पद्भ्यामेव गतवान्।
iv. सोमशर्मा स्नानं कृतवान्।

**Ans:**
**i. सः अनन्तभट्टं प्रति पद्भ्यामेव गतवान्।**
**ii. सोमशर्मा स्नानं कृतवान्।**
**iii. शुचिर्भूतः सः अनन्तभट्टस्य गृहं प्रत्यागतवान्।**
**iv. वैद्यस्य पत्न्या प्रातराशः परिवेषितः।**

**3. घटनाक्रमानुसारेण पुनर्लिखत।**

सोमशर्मा →
i. अनन्तभट्टस्य आदेशेन उद्विग्नः।
ii. अस्वास्थ्यमनुभवति स्म।
iii. प्रातराशं भक्षयित्वा सन्तुष्टः।
iv. पद्भ्यां चलनेन प्रसन्नः।

**Ans:**

सोमशर्मा →
**i. अस्वास्थ्यमनुभवति स्म।**
**ii. पद्भ्यां चलनेन प्रसन्नः।**
**iii. अनन्तभट्टस्य आदेशेन उद्विग्नः।**
**iv. प्रातराशं भक्षयित्वा सन्तुष्टः।**

## शब्दज्ञानम्।

### A. पर्यायशब्दानां चयनम्।

**I. परिच्छेदे पर्यायवाचिशब्दं चिनुत।**

*1. सधनः, धनवान्, धनाढ्यः (Rich) = **धनिकः।**
*2. भिषक्, चिकित्सकः, भिषग्वरः (Doctor) = **वैद्यः।**
*3. शीघ्रम्, चपलम्, तूर्णम्, आशु (Quickly) = **सत्वरम्।**
*4. सविधे, निकटे, अदूरे (Near) = **समीपे।**
*5. भार्या, जाया, कलत्रम् (Wife) = **पत्नी।**
6. श्रेष्ठी, भाण्डपतिः, सार्थवाहः, आपणिकः (Merchant) = **वणिक्।**
7. दासः, भृत्यः, परिजनः (Servent) = **सेवकः।**
8. रोगी, अस्वस्थः (Sick) = **रुग्णः।**
9. सदनम्, निकेतनम् (House) = **गृहम्।**

**II. परिच्छेदात् पर्यायशब्दयुगलं चिनुत।**

1. सत्वरम् = **शीघ्रम्** (Quickly)।
2. समीपे = **निकटे** (Near)।
3. प्रसन्नः = **सन्तुष्टः** (Pleased)।
4. अवदत् = **अभाषत** (Said)।

### B. परिच्छेदे विलोमशब्दं चिनुत।

*1. शनैः, मन्दम् (Slowly) × **सत्वरम्, शीघ्रम्** (Fast, Quickly)।
*2. दूरे (Far) × **समीपे, निकटे** (Near)।
3. सफलाः (Fruitful) × **विफलाः** (Futile)।
4. दरिद्रः, अधनः (Poor) × **धनिकः** (Rich)।
5. स्वास्थ्यम् (Health) × **अस्वास्थ्यम्** (Sickness)।
6. सूर्यास्तः (Sunset) × **सूर्योदयः** (Sunrise)।
7. असन्तुष्टः (Unsatisfied) × **सन्तुष्टः** (Satisfied)।

### C. समूहेतरं पदं चित्वा लिखत।

1. आसन्, आगच्छतु, प्रत्यागच्छतु, करोतु
**Ans: आसन्।**

2. समीपे, प्रति, प्रेषितः, निकटे
**Ans: प्रेषितः।**

3. समाप्य, स्नात्वा, गत्वा, भक्षयित्वा
**Ans: समाप्य।**

4. आसीत्, निवसति, आसन्, अभवत्
**Ans: निवसति।**

5. गतवान्, कृतवान्, प्रत्यागतवान्, प्रेषितः
**Ans: प्रेषितः।**

6. लिखितम्, कथितम्, कृतवान्, आनीते

**Ans:** **कृतवान्।**

7. गन्तव्यम्, उपचरितुम्, करणीयानि, कार्याणि

**Ans:** **उपचरितुम्।**

**D. योग्यं चतुर्थपदं लिखत।**

1. सोमशर्मा : वणिक् :: अनन्तभट्टः : _______

**Ans:** सोमशर्मा : वणिक् :: अनन्तभट्टः : **वैद्यः**

2. सत्वरम् : शीघ्रम् :: समीपे : _______

**Ans:** सत्वरम् : शीघ्रम् :: समीपे : **निकटे**

3. आ + नी : आनेतुम् :: उप + चर् : _______

**Ans:** आ + नी : आनेतुम् :: उप + चर् : **उपचरितुम्**

4. गत्वा : गम् – गच्छ् :: भक्षयित्वा : _______

**Ans:** गत्वा : गम् – गच्छ् :: भक्षयित्वा : **भक्ष्**

5. सः : तस्य :: अहम् : _______

**Ans:** सः : तस्य :: अहम् : **मम**

6. निवसति स्म : न्यवसत् :: अनुभवति स्म : _______

**Ans:** निवसति स्म : न्यवसत् :: अनुभवति स्म : **अन्वभवत्**

7. प्रेषितः : प्रेष् :: लिखितम् : _______

**Ans:** प्रेषितः : प्रेष् :: लिखितम् : **लिख्**

8. धनिकः : धनिका :: वणिक् : _______

**Ans:** धनिकः : धनिका :: वणिक् : **वणिजः**

**E. धातुसाधित-अव्ययानां चयनम्।**

**1. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।**

**Ans:** **त्वान्त-अव्ययानि-**

i. स्नात्वा ii. गत्वा

iii. भक्षयित्वा

**ल्यबन्त-अव्ययम्-**

i. समाप्य

**2. गद्यांशे आगते हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये चित्वा लिखत।**

**Ans:** i. आनेतुम् i. उपचारितुम्

**F. सन्धिविग्रहं कुरुत।**

| | | | |
|---|---|---|---|
| *1. | धनिको वणिक् | = | **धनिकः + वणिक्।** |
| *2. | इत्यवदत् | = | **इति + अवदत्।** |
| *3. | अनन्तभट्टोऽभाषत | = | **अनन्तभट्टः + अभाषत।** |
| 4. | चिकित्सामभिलषन् | = | **चिकित्साम् + अभिलषन्।** |
| 5. | सूर्योदयादनन्तरम् | = | **सूर्योदयात् + अनन्तरम्।** |
| 6. | ततस्तमानेतुम् | = | **ततः + तम् + आनेतुम्।** |
| 7. | भवन्तमुपचरितुम् | = | **भवन्तम् + उपचरितुम्।** |
| 8. | प्रवहतो निर्झरस्य | = | **प्रवहतः + निर्झरस्य।** |
| 9. | ततस्तस्य | = | **ततः + तस्य।** |

**G. सन्धिं कुरुत।**

| | | | |
|---|---|---|---|
| 1. | केन + अपि | = | **केनापि।** |
| 2. | सानन्दम् + इच्छामि | = | **सानन्दमिच्छामि।** |
| 3. | तथा + अपि | = | **तथापि।** |
| 4. | स्वयम् + एव | = | **स्वयमेव।** |
| 5. | अनिच्छया + एव | = | **अनिच्छयैव।** |
| 6. | सात्त्विकम् + अल्पम् | = | **सात्त्विकमल्पम्।** |
| 7. | सन्तुष्टः + अभवत् | = | **सन्तुष्टोऽभवत्।** |

**H. विशेष्य-विशेषण-अन्विति:।**

**1. सोमशर्मणः कृते प्रयुक्तानि विशेषणानि चित्वा जालचित्रं पूरयत।**




**Ans:** **1. धनिकः** **2. उद्योगव्यग्रः**

**3. प्रसन्नः** **4. उद्विग्नः**

**5. शुचिर्भूतः**

**2. परिच्छेदस्थानि विशेष्याणि लिखत।**

**i.** धनिकः **वणिक्।**

**ii.** करणीयानि **कार्याणि।**

**iii.** सात्त्विकम् **प्रातराशम्।**

**iv.** गच्छता **कालेन।**

**3. उचित रूपं लिखत।**

**i.** उद्योगव्यगः वणिक्।

**उद्योगव्यग्रा** अध्यापिका।

**उद्योगव्यग्रं** मित्रम्।

**ii.** सेवकः प्रेषितः।

पत्रिका **प्रेषिता।**

पुस्तकं **प्रेषितम्।**

## गद्यांशः - 2

**अनन्तरं सः अनन्तभट्टेन ..........................................................................सहर्षं स्वगृहं न्यवर्तत।**

**(words 150)**

अनन्तरं सः अनन्तभट्टेन सह उद्याने **आम्रवृक्षस्य + अधः दोलायाम् + उपविष्टः।**

Then after, with Anantbhatta, he sat on the swing below the mango tree in the garden.

औषधानां विषये वारं वारं सोमशर्मणा पृष्टे सति **अनन्तभट्टः + व्याधयः** कीदृशं पीडयन्ति एतत् **स्पष्टीकुर्वन् + आसीत्।**

Being repeatedly asked by Somasharma, regarding the medicines, Anantabhatta was explaning that how diseases cause pain.

**दोलायाम् + उपविष्टः** सोमशर्मा शनैः शनैः **निद्राधीनः + जातः।**

Somasharma being seated on the swing, gradually fell asleep.

सहसा लघ्वाघातेन जागरितः सोमशर्मा **संकोचेन + अवदत्** , "क्षम्यताम्।

Suddenly, awakened by a small jerk, Somasharma embarasingly said, "excuse (me).

**निद्रापीडितः + अहं** कदा सुप्तः इति न जाने।

Being afflicted by sleep, I don't know when I felt asleep.

**अतः + चकितः + अहम्।**

So, I was surprised.

कृपया भवान् मम उपचारान् कथयति किम्?"

Could you please tell me about my treatment?"

सुहास्यवदनः **अनन्तभट्टः + अवदत्** , **"भवतः + उपचाराः प्रारब्धाः + एव।**

Having pleasant smile on the face, Anantabhatta said, "Your treatments have already started.

मम षड्भिः **सहायकैः + वैद्यैः** चिकित्सकरूपेण **कार्यम् + आरब्धम्।**"

My six assistant doctors have started the work as healers."

**एतत् + निशम्य** चकितचकितः सोमशर्मा अपृच्छत्, "षड् वैद्याः?"

Having heard this, extremely astonished Somasharma asked, "Six doctors?"

अनन्तभट्टः प्रत्युवाच – "सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, **विश्रामः + च + इति।**

Anantabhatta replied, "Sunlight, pleasant breeze, cool water, exercise, wholesome food and rest.

**एतेभ्यः + महत्तराः के + अपि सहायकाः वैद्याः + न** वर्तन्ते।

There are no other assistant doctors superior than these ones.

**भवत्सदृशाः + विविधकार्यव्यग्राः + जनाः + एतेषु** षट्सु वैद्येषु **न + अवधानं ददति + इति जानामि + अहम्।**

I know that, people like you who are busy in various works, don't pay attention to these six doctors.

**अतः + एव** भवान् प्रभाते **पद्भ्याम् + आगच्छतु** इति मया कथितम्।

That is why, I told you to come on foot in the morning.

**भवन्तम् + अहं** शीतलजले स्नातुं सात्त्विकभोजनं भोक्तुं च प्रेरितवान्।

I motivated you to bath in cool water and eat wholesome food.

एते **सर्वे + अनुभवाः आनन्ददायकाः + इति** भवता **सूचितम् + एव।**

It was indicated by you that all these experiences were delightful.

**भवान् + एतान्** षड्वैद्यान् प्रति अवधानं दत्त्वा **आनन्दम् + अनुभवतु।**

You experience happiness by paying attention to these six doctors.

एतेषां षण्णां **वैद्यानाम् + उपचाराः + उत्तमाः + न** सन्ति किम्?

Are not the treatments of these six doctors the best?

**इतः** + **अपि** यदि **भवान्** + **अधिकं साहाय्यम्** + **अपेक्षते** तर्हि **सप्तमः** + **वैद्यः** + **अहं** सहकार्यार्थं **सदा** + **एव सिद्धः** + **अस्मि** + **इति।"**
If at all, you expect further additional help, then myself, the seventh doctor is always ready to help."

बद्धाञ्जलिः सोमशर्मा **सादरम्** + **अनन्तभट्टाय** अकथयत् "सप्तमस्य वैद्यस्य आवश्यकता न स्यात् **एतदर्थे** + **अहं सदा** + **एव** यथाशक्ति प्रयतिष्ये।"
With folded hands, Somasharma said with due respect to Anantabhatta, "I will always strive to the best of my capability, so that there should not be the need of seventh doctor."

**ततः** + **वैद्यराजाय** धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।
Then after giving thanks to the great doctor, Somasharma happily returned to his home.

## अवबोधनम्।

### A. एकवाक्येन उत्तरं लिखत।

*1. सोमशर्मा अनन्तभट्टेन सह **कुत्र** उपविष्टः?
**Ans:** सोमशर्मा अनन्तभट्टेन सह **उद्याने आम्रवृक्षस्य अधः दोलायाम्** उपविष्टः ।

*2. सोमशर्मा **कुत्र** निद्राधीनः जातः?
**Ans:** सोमशर्मा **दोलायां** निद्राधीनः जातः।

*3. विविधकार्यव्यग्राः जनाः **किं कुर्वन्ति**?
**Ans:** विविधकार्यव्यग्राः जनाः **षट्सु वैद्येषु अवधानं न ददति**।

4. निद्रापीडितः **कः** सुप्तः?
**Ans:** निद्रापीडितः **सोमशर्मा** सुप्तः।

5. **कैः** चिकित्सकरूपेण कार्यमारब्धम्?
**Ans:** **अनन्तभट्टस्य षड्भिः सहायकैर्वैद्यैः** चिकित्सकरूपेण कार्यमारब्धम् ।

6. षड् वैद्याः **के**?
**Ans:** **सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामः च इति** षड् वैद्याः।

7. अनन्तभट्टः **किं** स्पष्टीकुर्वन्नासीत्?
**Ans:** अनन्तभट्टः **व्याधयः कीदृशं पीडयन्ति एतत्** स्पष्टीकुर्वन्नासीत्।

8. सदैव सहकार्यार्थं सिद्धः सप्तमः वैद्यः **कः**?
**Ans:** सदैव सहकार्यार्थं सिद्धः सप्तमः वैद्यः **अनन्तभट्टः**।

9. सोमशर्मा अनन्तभट्टेन सह **कस्य** अधः दोलायाम् उपविष्ट?
**Ans:** सोमशर्मा अनन्तभट्टेन सह **आम्रवृक्षस्य** अधः दोलायाम् उपविष्ट।

10. सोमशर्मणा वारं वारं **कस्य** विषये पृष्टम्?
**Ans:** सोमशर्मणा वारं वारं **औषधानाम्** विषये पृष्टम्।

11. षड्भिः सहायकैर्वैद्यैः **केन** रूपेण कार्यमारब्धम्?
**Ans:** षड्भिः सहायकैर्वैद्यैः **चिकित्सकरूपेण** कार्यमारब्धम्।

12. अनन्तभट्टः **किं** भोक्तुं प्रेरितवान्?
**Ans:** अनन्तभट्टः **सात्त्विकभोजनम्** भोक्तुं प्रेरितवान्।

13. अनन्तभट्टः **किमर्थं** सदैव सिद्धः अस्ति?
**Ans:** अनन्तभट्टः **सहकार्यार्थम्** सदैव सिद्धः अस्ति।

14. **कस्मै** धन्यवादान् प्रदाय सोमशर्मा स्वगृहं न्यवर्तत?
**Ans:** **वैद्यराजाय** धन्यवादान् प्रदाय सोमशर्मा स्वगृहं न्यवर्तत।

15. सोमशर्मा सहर्षं **कुत्र** न्यवर्तत?
**Ans:** सोमशर्मा सहर्षं **स्वगृहम्** न्यवर्तत।

### B. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।

*1. एतेषु _______ वैद्येषु नावधानं ददतीति।
(षड्भिः, षट्सु, षड्)
**Ans:** एतेषु **षट्सु** वैद्येषु नावधानं ददतीति।

2. मम _______ सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्। (षड्भिः, षण्णाम्, षट्सु)
**Ans:** मम **षड्भिः** सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

3. _______ महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते।
(एतेषाम्, एतेभ्यः, एतैः)
**Ans:** **एतेभ्यः** महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते।

4. सः _______ सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः।
(अनन्तभट्टाय, अनन्तभट्टेन, अनन्तभट्टस्य)
**Ans:** सः **अनन्तभट्टेन** सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः।

5. भवानेतान् _______ प्रति अवधानं दत्त्वा आनन्दमनुभवतु।
(षड्वैद्येभ्यः, षड्वैद्यानाम्, षड्वैद्यान्)
**Ans:** भवानेतान् **षड्वैद्यान्** प्रति अवधानं दत्त्वा आनन्दमनुभवतु।

6. एतेषां _______ वैद्यानामुपचारा उत्तमा न सन्ति किम्?
(षण्णाम्, षट्सु, षड्भिः)
**Ans:** एतेषां **षण्णां** वैद्यानामुपचारा उत्तमा न सन्ति किम्?

7. सोमशर्मा सादरम् _______ अकथयत्।

(अनन्तभट्टे, अनन्तभट्टम्, अनन्तभट्टाय)

**Ans:** सोमशर्मा सादरम् **अनन्तभट्टाय** अकथयत्।

8. _______ धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।

(वैद्यराजेन, वैद्यराजाय, वैद्यराजम्)

**Ans:** **वैद्यराजाय** धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।

**C. कः कं वदति? इति लिखत।**

1. 'निद्रापीडितोऽहं कदा सुप्तः इति न जाने।'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति।**

2. 'अतश्चकितोऽहम्।'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति।**

3. 'कृपया भवान् मम उपचारान् कथयति किम्?।'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति।**

4. 'भवत उपचाराः प्रारब्धा एव।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

5. 'मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

6. 'षड् वैद्याः?'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति।**

7. 'एतेभ्यो महत्तराः केऽपि सहायकाः वैद्याः न वर्तन्ते।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

8. 'भवानेतान् षड्वैद्यान् प्रति अवधानं दत्वा आनन्दमनुभवतु।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

9. 'एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्?'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

10. 'सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति।'

**Ans:** **अनन्तभट्टः सोमशर्माणं वदति।**

11. 'सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये।'

**Ans:** **सोमशर्मा अनन्तभट्टं वदति।**

**D. सत्यं वा असत्यम्।**

1. सोमशर्मा जम्बूवृक्षस्याधः दोलायामुपविष्टः।

**Ans:** **असत्यम्।**

2. दोलायामुपविष्टः अनन्तभट्टः शनैः शनैः निद्राधीनो जातः।

**Ans:** **असत्यम्।**

3. विविधकार्यव्यग्राः जनाः एतेषु षट्सु वैद्येषु अवधानं न ददति।

**Ans:** **सत्यम्।**

4. एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति।

**Ans:** **असत्यम्।**

**F. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

1. दोलायामुपविष्टः सोमशर्मा सुप्तः। यतः _______

(सः निद्रापीडितः आसीत्। / रात्रिः जाता।)

**Ans:** दोलायामुपविष्टः सोमशर्मा सुप्तः। यतः **सः निद्रापीडितः आसीत्।**

2. _______ अनन्तभट्टवैद्यः सोमशर्माणं पद्भ्यामागन्तुं कथितवान्।

(जनाः षट्सु वैद्येषु नावधानं ददतीति ज्ञात्वा / तस्य समीपे वाहनं नास्तीति ज्ञात्वा)

**Ans:** **जनाः षट्सु वैद्येषु नावधानं ददतीति ज्ञात्वा** अनन्तभट्टवैद्यः सोमशर्माणं पद्भ्यामागन्तुं कथितवान्।

**माध्यमभाषया स्वमतप्रकटनम्।**

1. के अनर्घाः षड् वैद्याः?

**Ans:** Sunlight, pleasant breeze, cool water, exercise, wholesome food and rest are the six naturally available precious doctors. They can help to keep everybody mentally and physically fit. They never ask for anything in return as their fees. They do not discriminate between people. Some of them available in nature. And everybody has to take care of their body by eating wholesome food at proper times and exercising regularly. One must also rest at proper timings. This helps us to keep fit and live long healthy life. And one can surely keep a real doctor at bay.

2. षण्णां वैद्यानां सहाय्येन वयं कथं आनन्देन जीवितुं शक्नुमः?

**Ans:** In the lesson **'अनर्घाः षड् वैद्याः।'** we know about six naturally available precious doctors, which keep the real doctor away.

'Sound mind in a sound body' leads to happy life. Sunlight, pleasant breeze, cool water, exercise, wholesome food and rest are the six valuable doctors that give us both physical and mental health.

Walking in the early sun gives vitamin D. Cool breeze removes fatigue. Taking bath in cool water activates functioning of the body. Wholesome food at proper time helps in energyzing the body. Exercise stimulates the whole body and mind and keeps the body in shape. Rest regulates all internal functioning of the body. In this way six doctors help us to live a long, healthy and happy life.

## पृथक्करणम्।

**1. अधोनिर्दिष्टं जालरेखाचित्रं पूरयत।**




**Ans:** 1. **सूर्यप्रकाशः** 2. **सुखदवायुः**
3. **शीतलजलम्** 4. **व्यायामः**
5. **सात्त्विकभोजनम्** 6. **विश्रामः**

**2. योग्यानि विशेषणानि चित्वा जालरेखाचित्रे पूरयत।**

निद्राधीनः, सुहास्यवदनः, चकितचकितः, सप्तमो वैद्यः, विविधकार्यव्यग्रः, वैद्यराजः, बद्धाञ्जलिः

**Ans:**




## क्रमसंयोजनम्।

**1. अधोलिखितानि वाक्यानि क्रमानुसारं पुनर्लिखत।**

i. चकितचकितः सोमशर्मा अपृच्छत्, "षड् वैद्याः?"
ii. सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।
iii. सोमशर्मा शनैः शनैः निद्राधीनः जातः।
iv. सः आम्रवृक्षस्याधः दोलायामुपविष्टः।

**Ans:** **i. सः आम्रवृक्षस्याधः दोलायामुपविष्टः।**
**ii. सोमशर्मा शनैः शनैः निद्राधीनः जातः।**
**iiii. चकितचकितः सोमशर्मा अपृच्छत्, "षड् वैद्याः?"**
**iv. सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।**

## शब्दज्ञानम्।

### A. पर्यायशब्दानां चयनम्।

| | | | |
|---|---|---|---|
| *1. | विश्रान्तिः, विरतिः, विरामः (Rest) | = | **विश्रामः।** |
| *2. | अमूल्यः, मूल्यवान् (Priceless) | = | **अनर्घः।** |
| 3. | निद्राधीनः (Asleep) | = | **सुप्तः।** |
| 4. | रसालतरुः, सहकारवृक्षः (Mango tree) | = | **आम्रवृक्षः।** |
| 5. | सन्तोषः, मोदः (Happiness) | = | **आनन्दः।** |
| 6. | सहायता, सहकार्यम्, साह्यम् (Help) | = | **साहाय्यम्।** |
| 7. | रोगाः, गदाः, रुजाः (Diseases) | = | **व्याधयः।** |

### B. विलोमशब्दानां चयनम्।

| | | | |
|---|---|---|---|
| *1. | उपरि (Above) | × | **अधः** (Below)। |
| *2. | सत्वरम्, शीघ्रम् (Quickly) | × | **शनैः शनैः** (Slowly)। |
| *3. | जागरितः (Awakened) | × | **निद्राधीनः, सुप्तः** (Asleep)। |
| 4. | समाप्ताः (Finished) | × | **प्रारब्धाः** (Started)। |
| 5. | समाप्तम् (Finished) | × | **आरब्धम्** (Started)। |
| 6. | अनवधानम् (Inattention) | × | **अवधानम्** (Attention)। |
| 7. | दुःखदायकाः (Giving pain) | × | **आनन्ददायकाः** (Giving happiness)। |
| 8. | अधमाः, अवराः (Inferior) | × | **उत्तमाः** (Great)। |

### C. लिङ्गज्ञानम् ।

**1. चतुर्थपदं लिखत ।**

दोला ⁝ दोलायाम् ⁝⁝ भगवद्गीता ⁝ _______

**Ans:** दोला ⁝ दोलायाम् ⁝⁝ भगवद्गीता ⁝ **भगवद्गीतायाम्**

**2. रिक्तस्थानपूर्तिं कुरुत ।**

सुहास्यवदन : अनन्तभट्ट :।
_______ शिक्षिका ।
_______ मित्रम् ।

**Ans:** सुहास्यवदन : अनन्तभट्ट :।
**सुहास्यवदना** शिक्षिका ।
**सुहास्यवदनं** मित्रम् ।

### D. समूहेतरं पदं चित्वा लिखत।

**1.** अवदत्, अपृच्छत्, प्रयतिष्ये, न्यवर्तत
**Ans:** **प्रयतिष्ये।**

**2.** निद्राधीनः, जागरितः, निद्रापीडितः, सुप्तः
**Ans:** **जागरितः।**

**3.** सूर्यप्रकाशः, व्यायामः, कार्यव्यग्रता, सात्त्विकभोजनम्
**Ans:** **कार्यव्यग्रता।**

**4.** सः, सहसा, कदा, एव
**Ans:** **सः।**

**5.** जातः, सुप्तः, सिद्धः, व्यायामः
**Ans:** **व्यायामः।**

**6.** वर्तन्ते, अनुभवतु, जानामि, अस्मि
**Ans:** **अनुभवतु।**

**7.** दत्त्वा, स्नातुम्, भोक्तुम्

**Ans:** **दत्त्वा।**

**8.** दत्त्वा, स्नातुम्, प्रदाय, निशम्य

**Ans:** **स्नातुम्।**

**E. योग्यं चतुर्थपदं लिखत।**

1. षड्भिः : वैद्यैः :: षण्णाम् : ________

**Ans:** षड्भिः : वैद्यैः :: षण्णाम् : **वैद्यानाम्**

2. नि + शम् : निशम्य :: प्र + दा : ________

**Ans:** नि + शम् : निशम्य :: प्र + दा : **प्रदाय**

3. स्ना : स्नातुम् :: भुज् : ________

**Ans:** स्ना : स्नातुम् :: भुज् : **भोक्तुम्**

4. भवतः : भवान् :: मम : ________

**Ans:** भवतः : भवान् :: मम : **अहम्**

5. कथ् : कथितम् :: सूच् : ________

**Ans:** कथ् : कथितम् :: सूच् : **सूचितम्**

6. के + अपि : केऽपि :: सर्वे + अनुभवा : ________

**Ans:** के + अपि : केऽपि :: सर्वे + अनुभवा : **सर्वेऽनुभवाः**

**F. धातुसाधित-अव्ययानां चयनम्।**

**1. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।**

**Ans:** **त्वान्त-अव्ययम्-**

i. दत्त्वा

**ल्यबन्त-अव्यये-**

i. निशम्य  ii. प्रदाय

**2. गद्यांशे आगते हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये चित्वा लिखत।**

**Ans:** i. स्नातुम्  ii. भोक्तुम्

**G. सन्धिविग्रहं कुरुत।**

| | | | |
|---|---|---|---|
| *1. | एतन्निशम्य | = | **एतत् + निशम्य।** |
| *2. | सहायकैर्वैद्यैः | = | **सहायकैः + वैद्यैः।** |
| *3. | सिद्धोऽस्मि | = | **सिद्धः + अस्मि।** |
| 4. | अतश्चकितोऽहम् | = | **अतः + चकितः + अहम्।** |
| 5. | विश्रामश्चेति | = | **विश्रामः + च + इति।** |
| 6. | सर्वेऽनुभवाः | = | **सर्वे + अनुभवाः।** |

**H. सन्धिं कुरुत।**

| | | | |
|---|---|---|---|
| *1. | ददति + इति | = | **ददतीति।** |
| *2. | वैद्यः + अहम् | = | **वैद्योऽहम्।** |
| *3. | जानामि + अहम् | = | **जानाम्यहम्।** |
| 4. | संकोचेन + अवदत् | = | **संकोचेनावदत्** |
| 5. | निद्रापीडितः + अहम् | = | **निद्रापीडितोऽहम्।** |
| 6. | के + अपि | = | **केऽपि।** |
| 7. | इतः + अपि | = | **इतोऽपि।** |

**I. विशेष्य-विशेषण-अन्वितिः।**

**1. रिक्तस्थाने योग्यं पदं लिखत।**

उपचाराः प्रारब्धाः।

________ प्रारब्धौ।

________ प्रारब्धः।

**Ans:** उपचाराः प्रारब्धाः।

**उपचारौ** प्रारब्धौ।

**उपचारः** प्रारब्धः।

**2. चतुर्थपदं लिखत।**

सहायकाः : वैद्याः :: सहायकैः : ________

**Ans:** सहायकाः : वैद्याः :: सहायकैः : **वैद्यैः**

**3. मेलनं कुरुत।**

| | A | | B |
|---|---|---|---|
| i. | षड्भिः | a. | वैद्याः। |
| ii. | षण्णाम् | b. | वैद्येषु। |
| iii. | षड् | c. | वैद्यानाम्। |
| iv. | षट्सु | d. | वैद्यैः। |

**Ans:** **i. षड्भिः - वैद्यैः।  ii. षण्णाम् - वैद्यानाम्।**
**iii. षड् - वैद्याः।  iv. षट्सु - वैद्येषु।**

## कृतिपत्रिकायाः पञ्चमः विभागः - व्याकरणम्-उपयोजनकौशलम्।

### पदपरिचयः।

**धातवः। (Roots)**

| वर्तमानकालः। (लट् - लकारः।) (Present Tense) | | | | | | |
|---|---|---|---|---|---|---|
| **क्र.** | **रूपम्** | **मूलधातुः** | **गणः, पदम्** | **कालः / अर्थः** | **पुरुषः** | **वचनम्** |
| *1. | जाने | ज्ञा | 9 उ.प. here आ.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| *2. | जानासि | ज्ञा | 9 उ.प. here प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |

| | | | | | | |
|---|---|---|---|---|---|---|
| *3. | ददति | दा | 3 उ.प. here प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| 4. | पीडयन्ति | पीड् | 10 उ.प. here प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| 5. | जानामि | ज्ञा | 9 उ.प. here प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| 6. | अपेक्षते | अप + ईक्ष् | 1 आ.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| **प्रथमभूतकालः। (लङ् - लकारः।) (Imperfect Past Tense)** | | | | | | |
| *7. | अपृच्छत् | प्रच्छ् – पृच्छ् | 6 प.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |
| *8. | न्यवर्तत | नि + वृत् – वर्त् | 1 आ.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |
| 9. | अभाषत | भाष् | 1 आ.प. | प्रथमभूतकालः | तृतीयः | एकवचनम् |
| **आज्ञार्थः। (लोट् - लकारः।) (Imperative Mood)** | | | | | | |
| *10. | करोतु | कृ | 8 उ.प. here प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| 11. | अनुभवतु | अनु + भू – भव् | 1 प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| 12. | आगच्छतु | आ + गम् – गच्छ | 1 प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| **कर्मणि-क्रियापदाः। (Passive Verbs)** | | | | | | |
| 13. | क्षम्यताम् | क्षम् | 1 आ.प. | कर्मणि-आज्ञार्थः | तृतीयः | एकवचनम् |
| 14. | अपेक्ष्यते | अप + ईक्ष् | 1 आ.प. | कर्मणि-वर्तमानकालः | तृतीयः | एकवचनम् |
| **भविष्यकालः। (लृट् - लकारः।) (Second Future Tense)** | | | | | | |
| 15. | प्रयतिष्ये | प्र + यत् | 1 आ.प. | भविष्यकालः | प्रथमः | एकवचनम् |
| **परोक्षभूतकालः।** | | | | | | |
| 16. | प्रत्युवाच | प्रति + वच् | 2 प.प. | परोक्षभूतकालः | तृतीयः | एकवचनम् |
| | | प्रति + ब्रू | 2 उ.प. here प.प. | | | |

**पूर्वकालवाचक – धातुसाधित – अव्ययानि। (Gerunds)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचक-धातुसाधितम् |
|---|---|---|---|---|
| 17. | दत्त्वा | दा - यच्छ् | 1 प.प. | त्वान्त - अव्ययम् |
| | | दा | 3 उ.प. | |
| 18. | स्नात्वा | स्ना | 2 प.प. | त्वान्त - अव्ययम् |
| 19. | भक्षयित्वा | भक्ष् | 10 उ.प. | त्वान्त - अव्ययम् |
| 20. | निशम्य | नि + शम् | 4 प.प. | ल्यबन्त - अव्ययम् |
| 21. | प्रदाय | प्र + दा | 1 प.प., 3 उ.प. | ल्यबन्त - अव्ययम् |
| 22. | समाप्य | सम् + आप् | 5 प.प. | ल्यबन्त - अव्ययम् |

**हेत्वर्थक – धातुसाधित – तुमन्त – अव्ययानि। (Infinitives)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक – धातुसाधितम् |
|---|---|---|---|---|
| *23. | आनेतुम् | आ + नी-नय् | 1 उ.प. | तुमन्त - अव्ययम् |
| 24. | उपचरितुम् | उप + चर् | 1 प.प. | तुमन्त - अव्ययम् |
| 25. | भोक्तुम् | भुज् | 7 उ.प. | तुमन्त - अव्ययम् |

**कर्मणि-विध्यर्थक-धातुसाधित – विशेषणानि। (Potential Passive Participles)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कर्मणि-विध्यर्थकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| 26. | गन्तव्यम् | गम् – गच्छ् | 1 प.प. | कर्मणि-विध्यर्थक-धा-वि. | पुंलिङ्गम् | द्वितीया | एकचवनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकचवनम् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 27. | करणीयानि | कृ | 8 उ.प. | कर्मणि-विध्यर्थक-धा-वि. | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| **कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि। (Past Passive Participles)** | | | | | | | |
| **क्र.** | **रूपम्** | **मूलधातुः** | **गणः, पदम्** | **कर्मणि-भूतकालवाचकम्** | **लिङ्गम्** | **विभक्तिः** | **वचनम्** |
| 28. | कथितम् | कथ् | 10 उ.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| 29. | लिखितम् | लिख् | 6 प.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| 30. | पृष्टे | प्रच्छ् – पृच्छ् | 6 प.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम्, नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| 31. | प्रारब्धाः | प्र + आ + रभ् | 1 आ.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| | | | | | स्त्रीलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| 32. | प्रेषितः | प्रेष् | 10 प.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 33. | आनीते | आ + नी-नय् | 1 उ.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम्, नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| 34. | सूचितम् | सूच् | 10 उ.प. | कर्मणि भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| **कर्तरि – भूतकालवाचक–धातुसाधित – विशेषणानि। (Past Active Participles)** | | | | | | | |
| **क्र.** | **रूपम्** | **मूलधातुः** | **गणः, पदम्** | **कर्तरि - भूतकालवाचकम्** | **लिङ्गम्** | **विभक्तिः** | **वचनम्** |
| *35. | कृतवान् | कृ | 8 उ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 36. | प्रत्यागतवान् | प्रति + आ + गम् – गच्छ् | 1 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 37. | सुप्ताः | स्वप् (Intransitive) | 2 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| | | | | | स्त्रीलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| 38. | जाताः | जन् –जा (Intrasitive) | 4 आ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| | | | | | स्त्रीलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 39. | आरब्धम् | आ + रभ् | 1 आ.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| 40. | सिद्धः | सिध् (Intransitive) | 4 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 41. | उपविष्टः | उप + विश् (Intransitive) | 6 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 42. | सन्तुष्टः | सम् + तुष् (Intransitive) | 4 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 43. | प्रसन्नः | प्र + सद् (Intransitive) | 1 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 44. | भूतः | भू – भव् | 1 प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

**प्रयोजकम्। (Causal)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | कर्तरि - भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|---|
| *45. | परिवेषितम् | परि + विष् | 1 प.प., 3 उ.प. | प्रयोजकम् | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| 46. | प्रेरितवान् | प्र + ईर् | 2 आ.प. | प्रयोजकम् | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

**वर्तमानकालवाचक – धातुसाधित – विशेषणानि। (Present Participles)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | व. का. धा. वि. | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| 47. | अभिलषन् | अभि + लष् | 1 प.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| 48. | प्रवहतः | प्र + वह् | 1 उ.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम् | द्वितीया | बहुवचनम् |
| | | | | | | पञ्चमी, षष्ठी | एकवचनम् |
| 49. | गच्छता | गम् – गच्छ् | 1 प.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम् | तृतीया | एकवचनम् |
| 50. | सति | अस् | 2 प.प. | कर्तरि-व-का-धा-वि | पुंलिङ्गम्, नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |

**च्वि – रूपाणि। (च्वि -Forms)**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | च्वि-रूपम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| 51. | स्पष्टीकुर्वन् | स्पष्ट+ कृ | 8 उ.प. here प.प. | कर्तरि व. का. धा. वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

**नामानि। (Nouns)**

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *52. | वणिक् | वणिज् | ज्कारान्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| *53. | दिशि | दिश् | श्कारान्तम् | स्त्रीलिङ्गम् | सप्तमी | एकवचनम् |
| 54. | पद्भ्याम् | पाद | अकारान्तम् | पुंलिङ्गम् | तृतीया | द्विवचनम् (वैकल्पिक रूपम्) |
| 55. | पत्न्या | पत्नी | ईकारान्तम् | स्त्रीलिङ्गम् | तृतीया | एकवचनम् |
| 56. | दोलायाम् | दोला | आकारान्तम् | स्त्रीलिङ्गम् | सप्तमी | एकवचनम् |

**सर्वनामानि। (Pronouns)**

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| 57. | एतेषाम् | एतद् | तृतीयपुरुषः | पुंलिङ्गम्, नपुंसकलिङ्गम् | षष्ठी | बहुवचनम् |

| | | | | | | |
|---|---|---|---|---|---|---|
| 58. | तस्मै | तद् | तृतीयपुरुषः | पुंलिङ्गम्, नपुंसकलिङ्गम् | चतुर्थी | एकवचनम् |
| 59. | भवन्तम् | भवत् | तृतीयपुरुषः | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| 60. | त्वया | युष्मद् | द्वितीयपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| 61. | मया | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |

**संख्यावाचक – विशेषणानि। (Numerical Adjectives)**

| क्र. | रूपम् | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| *62. | षण्णाम् | षष् | त्रिषु लिङ्गेषु समानम् | षष्ठी | बहुवचनम् |
| 63. | षड्भिः | षष् | त्रिषु लिङ्गेषु समानम् | तृतीया | बहुवचनम् |
| 64. | षट्सु | षष् | त्रिषु लिङ्गेषु समानम् | सप्तमी | बहुवचनम् |
| 65. | एकस्मिन् | एक | पुंलिङ्गम्, नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |

## समासपरिचयः। (Compounds)

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समास नाम |
|---|---|---|---|---|
| | | **अव्ययीभावः।** | | |
| *1. | प्रतिदिनम् | दिने दिने।<br>(Everyday) | – | अव्ययीभावः। |
| *2. | यथाशक्ति | शक्तिम् अनुसृत्य / अनतिक्रम्य।<br>(To the best of ones power) | – | अव्ययीभावः। |
| | | **विभक्ति – तत्पुरुषः।** | | |
| *3. | निद्रापीडितः | निद्रया पीडितः।<br>(Afflicted by sleep) | – | तृतीया-तत्पुरुषः। |
| *4. | सूर्यप्रकाशः | सूर्यस्य प्रकाशः।<br>(Light of the Sun) | – | षष्ठी-तत्पुरुषः। |
| *5. | उद्योगव्यग्रः | उद्योगे/उद्योगेषु व्यग्रः।<br>(Engrossed in work) | – | सप्तमी-तत्पुरुषः। |
| 6. | भवत्सदृशाः | भवता सदृशाः।<br>(Like you) | – | तृतीया-तत्पुरुषः। |
| 7. | सहकार्यार्थम् | सहकार्याय इदम्।<br>(For the help) | – | चतुर्थी-तत्पुरुषः। |
| 8. | वैद्यराजाय | वैद्यानां राजा।<br>(King of doctors ) | तस्मै | षष्ठी-तत्पुरुषः। |
| 9. | सूर्योदयात् | सूर्यस्य उदयः।<br>(Rise of the Sun) | तस्मात् | षष्ठी-तत्पुरुषः। |
| 10. | स्वगृहम् | स्वस्य गृहम्।<br>(Own house) | – | षष्ठी-तत्पुरुषः। |
| | | **नञ् – तत्पुरुषः।** | | |
| **क्र.** | **समस्तपदम्** | **विग्रहः** | **विभक्तिः** | **समास-नाम** |
| *11. | अस्वास्थ्यम् | न स्वास्थ्यम्।<br>(Unhealthiness) | – | नञ्-तत्पुरुषः। |
| *12. | अनिच्छया | न इच्छा।<br>(No desire) | तया | नञ्-तत्पुरुषः। |
| | | **कर्मधारयः।** | | |
| *13. | सात्विकभोजनम् | सात्विकं भोजनम्।<br>(Nutritious food) | – | विशेषण – पूर्वपद-कर्मधारयः। |

| | | | | |
|---|---|---|---|---|
| *14. | शीतलजलम् | शीतलं जलम्। (Cold water) | – | विशेषण – पूर्वपद-कर्मधारय:। |
| 15. | लघ्वाघातेन | लघु: आघात:। (Small jerk) | तेन | विशेषण – पूर्वपद-कर्मधारय:। |
| 16. | षड्वैद्यान् | षड् वैद्या:। (Six doctors) | तान् | विशेषण – पूर्वपद-कर्मधारय:। |
| 17. | सुखदवायु: | सुखद: वायु:। (Pleasant breeze) | – | विशेषण – पूर्वपद-कर्मधारय:। |
| | | **बहुव्रीहि:।** | | |
| *18. | बद्धाञ्जलि: | बद्ध: अञ्जलि: येन स:। | – | समानाधिकरण-बहुव्रीहि:। |
| *19. | सानन्दम् | आनन्देन सह यथा स्यात् तथा। (Happily) | – | क्रियाविशेषण-सह-बहुव्रीहि:। |
| *20. | सादरम् | आदरेण सह यथा स्यात् तथा। (Respectfully) | – | क्रियाविशेषण-सह-बहुव्रीहि:। |
| *21. | सहर्षम् | हर्षेण सह यथा स्यात् तथा। (Happily) | – | क्रियाविशेषण-सह-बहुव्रीहि:। |
| 22. | सुहास्यवदन: | सुहास्यं वदनं यस्य स:। (one who is having pleasant smile on face) | – | समानाधिकरण-बहुव्रीहि:। |
| 23. | चन्द्रपुरनाम्नि | चन्द्रपुरं नाम यस्य तत्। (one whose name is चन्द्रपुर) | तस्मिन् | समानाधिकरण-बहुव्रीहि:। |
| 24. | अनर्घ: | न विद्यते अर्घं यस्य स:। (priceless), (valuable) | – | नञ्-बहुव्रीहि:। |
| 25. | विफला: | विगतं फलं येभ्य: ते। (Futile) | – | प्रादि-बहुव्रीहि:। |
| 26. | सत्वरम् | त्वरया सह यथा स्यात् तथा। (Quickly) | – | क्रियाविशेषण-सह-बहुव्रीहि:। |

## सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

*1. तेन धनिकेन सत्वरं सेवक: प्रेषित:। (प्रयोगपरिवर्तनं कुरुत।)

**Ans: स: धनिक: सत्वरं सेवकं प्रेषितवान्।**

**Note** – सर्वनाम (3) कर्ता (3) कर्म (1) कर्मणि भू.धा.वि (1) = कर्मणि प्रयोग:

तेन ↓ धनिकेन ↓ सत्वरं सेवक: ↓ प्रेषित:। ↓

स: धनिक: सत्वरं सेवकं प्रेषितवान्।

1 सर्वनाम, 1 कर्ता, Doesn't Change, 2 कर्म, 1 कर्तरि भू.धा.वि = कर्तरि प्रयोग:

*2. सोमशर्मा नाम धनिको निवसति स्म। ('स्म ' निष्कासयत।)

**Ans: सोमशर्मा नाम धनिको न्यवसत्।**

**Note** – Drop स्म

Change the verb in प्रथमभूतकाल:

Keep पुरुष: and वचनम् of the verb as it is.

*3. सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। (सतिसप्तमीरचनां निष्कासयत।)

**Ans: यदा सोमशर्मणा पृष्टम् आसीत् तदा अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्।**

**Note –** Identify the subordinate clause
Use 'यदा …. तदा' (when …. then) on either side of it.
Change words in the subordinate from सप्तमी to प्रथमा विभक्तिः
Rearrange the words if required.

( सोमशर्मणा **पृष्टे**(7) **सति**(7) ) अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्।

↓ ↓ ↓ ↓ ↓

**यदा सोमशर्मणा पृष्टम्**(1) **आसीत्**(1) **तदा** अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्।

*4. मम ______ सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्। ('षष्' सङ्ख्यावाचकस्य योग्यं रूपं लिखत।)

**Ans:** मम **षड्भिः** सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

**Note –** Numerical Adjective षष् follows the noun वैद्यैः
वैद्यैः → तृतीया बहुवचनम्
षष् → तृतीया बहुवचनम् is षड्भिः

*5. भवान् एतान् षड् वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु। ('अनुभवतु' पदस्य स्थाने 'अनुभव' इति प्रयुज्य वाक्यं पुनर्लिखत।)

**Ans: त्वम्** एतान् षड् वैद्यान् प्रति अवधानं दत्त्वा आनन्दम् **अनुभव।**

**Note –** भवान् is used with तृतीयपुरुषः एकवचनम् of Verb form.
त्वम् is used with द्वितीयपुरुषः एकवचनम् of Verb form.

*6. एतेषां _______ वैद्यानामुपचारा उत्तमा न सन्ति किम्? ('षष्' सङ्ख्यावाचकस्य योग्यं रूपं लिखत।)

**Ans:** एतेषां **षण्णां** वैद्यानामुपचारा उत्तमा न सन्ति किम्?

**Note –** Numerical Adjective षष् is applicable for the noun वैद्यानाम्
वैद्यानाम् is षष्ठी बहुवचनम्
षष्ठी बहुवचनम् of षष् is षण्णाम्.

*7. भवान् सत्वरमुपचारं करोतु। ('भवान्' पदस्य स्थाने 'त्वम्' योजयत।)

**Ans: त्वं** सत्वरमुपचारं **कुरु**।

**Note –** भवान् is used with तृतीयपुरुषः एकवचनम् of Verb form
त्वम् is used with द्वितीयपुरुषः एकवचनम् of Verb form.

*8. स गच्छता कालेन अस्वास्थ्यमनुभवति स्म। ('स्म' निष्कासयत।)

**Ans:** स गच्छता कालेन अस्वास्थ्य**मन्वभवत्**।

**Note –** Drop स्म
Change the verb to प्रथमभूतकालः
Keep पुरुषः and वचनम् of the verb as it is.

*9. भवान् प्रभाते पद्भ्यामागच्छतु। ('भवान्' पदस्य स्थाने 'त्वम्' योजयत।)

**Ans: त्वं** प्रभाते पद्भ्या**मागच्छ।**

**Note –** भवान् is used with तृतीयपुरुषः एकवचनम् of Verb form
त्वम् is used with द्वितीयपुरुषः एकवचनम् of Verb form.

# 03 नाट्यांशाः।

**संवादांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।**

1. प्रतिहारः : जयतु भोजराजः। देव कश्चित् पण्डितः सपरिवारं द्वारे प्रतीक्षते।

Door keeper : May king Bhoj be victorious! Your Majesty, a certain scholar along with his family, is waiting at the door.

राजा : सत्वरं दुग्धपूर्णं पात्रमेकमानय पण्डिताय च देहि।

(प्रतिहारः आज्ञापालनं करोति।)

King : Bring a vessel full of milk, immediately, and give (it) to the scholar.

(Door keeper follows the order)

पण्डितः : (दृष्ट्वा) अयि पुत्रवधु ! किञ्चित् शर्करां देहि। (शर्करा दुग्धे मिश्रयित्वा) भोः इदं पात्रं भोजराजाय प्रत्यर्पयतु।

Scholar : (Having seen) O daughter in law! Give some sugar. (Having mixed the sugar in the milk) O, return this vessel to king Bhoj.

राजा : (दृष्ट्वा) (सहर्षम्) विचक्षणः खलु अयं पण्डितः।

King : (Having seen) (happily) This scholar is clever indeed.

2. मन्त्री : महाराज ! दुग्धपूर्णं पात्रं दत्त्वा मया सूचितं यत् अस्माकं राजसभा पण्डितैः पूर्णा। तत्र अन्यस्य अर्थे स्थानं नास्तीति।

Minister : Your Majesty! Having given the vessel full of milk, it was suggested by me that our assembly is full of scholars. There is no place for anybody else.

राजा : अथ ब्राह्मणस्य उत्तरं किमासीत्?

King : Then what was the reply of the brahmin?

मन्त्री : तेन उत्तरितं - यथा दुग्धे शर्करा विलीना भवति तस्य माधुर्यं च वर्धयते। तथैवाहं पण्डितेषु निलीय स्थास्यामि, सभायाः माधुर्यं च वर्धयिष्यामि।

Minister : He replied–as the sugar dissolves in milk and increases its sweetness, similarly I will get fused in the scholars and will increase the sweetness of the assembly.

राजा : अहो ! अद्भूतं तस्योत्तरम्।

King Ah! His answer is wonderful.

3. दूतः : देव ! कश्चिद् दरिद्रः भवतो दर्शनप्रार्थी।

Messanger : Your Majesty! A certain poor man wants to meet you.

राजा : त्वरितं सादरमानय तम्। (दरिद्रः प्रविशति राजा पृच्छति) कुतः आगच्छसि भोः?

King : Bring him immediately with honour. (The poor man enters. King asks) Where have you come from?

दरिद्रः : कैलासाद् आगच्छामि देव।

Poor man : Your Majesty, I came from Kailasa.

राजा : ब्रूहि अपि न भगवान् शिवः सकुशलः?

King : Tell (me), is that Lord Shiva doing well?

दरिद्रः : तस्य कुशलतायाः प्रश्न एव न उदेति। स तु दिवंगतः।

Poor man : The question of his well-being does not arise. He indeed has gone to heaven. (literaly-died).

राजा : किं दिवंगतः? कथम्। अस्माभिः नैव श्रुतम्।

King : What? Has (he) gone to heaven? (died?) How? It is not heard by us at all.

4. दरिद्रः : राजन् ! शिवस्य मरणं वर्षशतकात् पूर्वमारब्धमासीत्। अधुना अचिरमेव समाप्तिम् अगच्छत्।

Poor man : O king! The (procedure of) death of Lord Shiva had started before a century. Now recently it has accomplished.

राजा : आश्चर्यम् ! कथं तत् सम्भवम्?

King : Surprising! How is that possible?

दरिद्रः : शृणोतु राजन् ! स किल हरिहररूपः। अतः अर्धं शरीरं हरिः अर्थात् भगवान् विष्णुः अहरत्।

Poor man : Listen, O King! He indeed is the combination of Hari (Lord Vishnu) and Har (Lord Shiva). Therefore half of the body was taken away by Hari (i.e. Lord Vishnu).

राजा : अन्यत् अर्धम्?

King : Remaining half?

दरिद्रः : स पुनः अर्धनारीश्वरः अपि तस्मात् अन्यदर्धं पार्वतीदेवी अनयत्।

Poor man : Moreover he is Ardhanareeshwar (**अर्धनारीश्वर** = the god with half body of a woman). Therefore Goddess Parvati took away the remaining half.

5. दरिद्रः : दिवंगतस्य शिवस्य अलङ्कारा: चन्द्रः गङ्गा सर्पराजः वासुकिः आकाशेन नीताः।

Poor man : The ornaments (in the form of) the moon, Ganga, Vasuki the King of snakes, of Lord Shiva who has gone to heaven were taken away by the sky.

राजा : ततः परम्।

King : then what is it.

दरिद्रः : ततः परमासन् तस्य गुणाः। तान् अन्ये विभज्य अनयन्।

Poor man : Then there were his virtues. Having distributed (them), others took them.

राजा : के?

King : Who (took them)?

दरिद्रः : दानशीलतां उदारतां वीरतां च भवान् अनयत्। अन्ते अवशिष्ट एकः एव गुणः तमेव गृहीत्वा अहं भूलोके भ्रमामि। भिक्षाटनं करोमि सदा।

Poor man : Your Majesty took away generosity, benevolence and valour. At the end, having taken the only one remaining virtue, I am wandering on the earth. I am always wandering for alms.

6. (अनन्यमानसं विचिन्तयन्तं निजसुपुत्रमवधार्य महिषी चन्द्रमतिः पृच्छति।)

(Having seen her own son being engrossed in thinking with undivided attention, Queen Chandramati asks,)

चन्द्रमतिः : वत्स चिरं जीव । केन कारणेन म्लानमुखः सचिन्तः दृश्यसे?

Chandramati : Long live, dear child! Why do you seem dejected and worried?

यशोधरः : (स्वगतम्) कथमिदानीं हृद्शल्यं निवेदयामि। निवेदयेयम्। भवतु (प्रकाशम्) अम्ब प्राप्तायामुषसि स्वप्नमेकमपश्यम्।

Yashodhar : (To himself) Now, how do I narrate my agony? I shall tell. Let it be. (Loudly), Mother, I saw a dream at the time of dawn.

चन्द्रमतिः : तेन हि सत्वरं कथय।

Chandramati : Then tell (that) immediately.

| | | |
|---|---|---|
| यशोधरः | : | शृणोतु कश्चन निशाचरः मम वक्षोदेशे निषण्णः। स आह राज्यभारं पुत्रे निधाय यतिर्भूत्वा तपोवनमाश्रय इति। |
| Yashodhar | : | Listen, some demon had sat on my chest. He said, having shouldered the responsibility of the kingdom to the son, becoming an ascetic, resort to a penance grove. |

7. (मनोरुग्णः मिलिन्दः - प्रभाते प्रतिवेशिनं प्रति गत्वा उच्चैः आक्रोशति।)

(Psychologically ill Milind-Having gone to the neighbour in the morning, shouts loudly)

| | | |
|---|---|---|
| मिलिन्दः | : | सखे परित्रायस्व परित्रायस्व माम्। रात्रौ मम मुखद्वारेण मार्जारशावकः उदरे प्रविष्टः। शृणु गुर्गुरायते। |
| Milind | : | O friend; save me, save me! At night a kitten entered my stomach through my mouth. Listen, (it is) purring. |
| निनादः | : | वयस्य न मार्जारशावकः परमेष वातविकारः। भिषग्वरं प्रति गच्छाव। |
| Ninad | : | Friend, it's not a kitten but it is gas trouble. Let us both go to the doctor. |
| मिलिन्दः | : | न न भिषग्वरं प्रति परं शल्यक्रियाविशारदं प्रति गन्तव्यम्। |
| Milind | : | No, not to the doctor but (we should) go to a surgeon. |
| निनादः | : | सत्यं खलु न मूर्खजनचित्तं समाराधयेत्। चल त्वरया। |
| Ninad | : | Indeed (it is) true (that) the mind of a fool can not be pleased. Come on quickly. |

8.

| | | |
|---|---|---|
| भिषग्वरः | : | किं वदसि उदरे मार्जारशावकः गुर्गुरायते? |
| Doctor | : | What do you say, a kitten is purring in stomach? |
| मिलिन्दः | : | परं रात्रौ किं करवाणि अहम्? |
| Miling | : | But what should I do at night? |
| भिषग्वरः | : | एतद् गुटिकाद्वयम्। एका त्वत्कृते एका मार्जारशावकस्य कृते शयनसुखमनुभवितुम्। (अन्येद्युः रुग्णालये) |
| Doctor | : | These are two pills. One is for you and one for the kitten, in order to experience the pleasure of sleep. (Next day in the hospital) |
| भिषग्वरः | : | अयि मिलिन्द, उत्तिष्ठ। शस्त्रक्रिया सफलीभूता। पश्य एष मार्जारशावकः तव उदरे आसीत्। अधुना निश्चिन्तो भव। |
| Doctor | : | O Milind, get up! The operation is successful. See this kitten was in your stomach. Now be at ease. |
| मिलिन्दः | : | (रुदितस्वरेण) परं मम उदरे तु कृष्णमार्जारः प्राविशत्, एष तु श्वेतः। |
| Milind | : | (With a cranky voice) But the kitten entered my stomach, was black and this is white. |

9.

| | | |
|---|---|---|
| राजा | : | (समन्तादवलोक्य) सूत, अकथितोऽपि ज्ञायत एव यथायमाश्रमाभोगस्तपोवनस्येति। (स्तोकमनन्तरं गत्वा) तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय यावदवतरामि। |
| King | : | (Having seen around) Charioteer, though untold only, it is but understood that this is an environment, of the penance grove. (Having gone a little inside), There should not be inconvinience to the residents of the penance grove. Therefore stop the chariot just here so that I (can) get down. |
| सूतः | : | धृताः प्रग्रहाः। अवतरत्वायुष्मान्। |
| Charioteer | : | The reigns are held. Let the long lived one alight. |
| राजा | : | (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति।) |
| King | : | (Having stepped down) Charioteer, one should enter the penancegroves as it is known in a modest attire. Therefore take this. (Thus hands the ornaments and bow over to the charioteer.) |

– From the play **'अभिज्ञानशाकुन्तलम्'** written by **'कालिदास'**

10. भीमः : आर्य, मुञ्चतु मां क्षणमेकं भवान्।

Bheem : O noble one, leave me for a moment.

युधिष्ठिरः : किमपरमवशिष्टम्?

Yudhishthir : What else has remained?

भीमः : आर्य, सुमहदवशिष्टम्। संयच्छामि तावदेन दुर्योधनदुःशासनरुधिरोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्।

Bheem : Noble one, the most important has remained. I shall tie up the hair of Panchali, dragged by Dusshasan, with this hand smeared by the blood of Duruyodhan and Dusshasan.

युधिष्ठिरः : सत्वरं गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्।

Yudhishthir : You should go immediately. Let that wretched lady experience the celebration of binding up of the braided hair.

भीमः : भवति पाञ्चालराजकन्ये दिष्ट्या वर्धसे रिपुकुलक्षयेण।

Bheem : O princess of Panchal, congratulations for the distruction of the family of enemy.

– From the play **'वेणीसंहारम्'** written by **'भट्टनारायण'**

11. कञ्चुकी : (सहसा प्रविश्य) इदं वासोयुगलम्।

Chamberlain : (Having entered suddenly) This is a pair of clothes.

नायकः : (दृष्टा सहर्षमात्मगतम्) दिष्ट्या सिद्धमाभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन।

Hero : (Having seen, with joy to himself) Fortunately my desire is fulfilled by this pair of red clothes, brought unexpectedly.

कञ्चुकी : देव्या, मित्रावसुजनन्या प्रेषितम्। तदेतत्परिधत्तां कुमारः।

Chamberlain : (This is) Sent by the Queen, mother of Mitravasu. May the prince wear this.

नायकः : कञ्चुकिन् उपनय। (कञ्चुकी रक्तवसनद्वयमुपनयति। गृहीत्वा आत्मगतम्।) सफलीभूतो मे मलयवत्याः पाणिग्रहः। (परिक्रम्य प्रकाशम्) कञ्चुकिन् गम्यताम्। मद्वचनादभिनन्दनीया देवी।

Hero : Chamberlain, bring (that) here, (Chamberlain brings the pair of red garments close. Having taken them, to himself) My marriage with Malayvati has borne fruit. (Having moved around, loudly) Chamberlain, you may go. May the queen be saluted on my behalf.

– From the play **'नागानन्दम्'** written by **'श्रीहर्ष'**

12. शर्विलकः : मदनिके ! समाश्वसिहि।

Sharvilaka : O Madanika! Take courage.

मदनिका : (समाश्वस्य) साहसिक ! न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन् गेहे कोऽपि व्यापादितः परिक्षतो वा?

Madanika : (Recovering breath) O adventurous one! Have you not indeed killed or injured anybody in that house while doing this improper act for me.

शर्विलकः : मदनिके ! भीते सुप्ते शर्विलकः न प्रहरति। तन्मया न कश्चिद् व्यापादितो नापि परिक्षतः।

Sharvilaka : O Madanika! Sharvilaka does not strike the one who is frightened or asleep. So anybody is neither killed nor injured by me.

मदनिका : प्रियं प्रियम्।

Madanika : Very good! Very good!

शर्विलकः : आः दुरात्मन् चारुदत्तहतक। अयं न भवसि।

Sharvilaka : O wicked Charudatta! You will be no more.

– From the play **'मृच्छकटिकम्'** written by **'शूद्रक'**

13. भरत: : अथ तुल्ये पुत्रविप्रवासे कथमहमरण्यं न प्रेषित:।

Bharat : When the seperation of son was considered the same then why wasn't I sent to the forest?

कैकेयी : जात ! मातुलकुले वर्तमानस्य प्रकृतिभूस्ते विप्रवास:।

Kaikayi : O child! Your seperation as you were staying with your maternal uncle's family, was habituated.

भरत: : अथ चतुर्दशवर्षाणि किं कारणमवेक्षितानि।

Bharat : Then why were fourteen years planned (observed)?

कैकेयी : जात ! चतुर्दश दिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दशवर्षाणीत्युक्तम्।

Kaikayi : Child! Fourteen years were uttered by (me) who was perplexed, desirous to say fourteen days.

भरत: : अस्ति पाण्डित्यं सम्यग् विचारयितुम्।

Bharat : There is cleverness to think properly.

– From the play **'प्रतिमा'** written by **'भास'**

14. प्रियंवदा : हा धिक् हा धिक्! अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला। (पुरोऽवलोक्य) एष दुर्वासा: सुलभकोपो महर्षि:। तथा शप्त्वा दुर्वारया गत्या प्रतिनिवृत्त:।

Priyamvada : Oh alas! Oh alas! Indeed unpleasant has happened. Absent minded Shakuntala has offended somebody worthy of reverence. (Having looked forward). This is Durvasa, the quick tempered (easily irascible) great sage. Having cursed in that manner (he) has returned with the irresistible gait.

अनसूया : कोऽन्यो हुतवहाद्दग्धुं प्रभवति। गच्छ पादयो: प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि।

Anasuya : Who else but the fire is able to burn. Go (and) having bowed to his feet persuade him to return while I (will) arrange the water for offering a respectful reception (to him)

प्रियंवदा : तथा। (इति निष्क्रान्ता।)

Priyamvada : Alright (goes out).

From the play **'अभिज्ञानशाकुन्तलम्'** written by **'कालिदास'**

15. राजा : तेन हि प्रस्तूयतां विवाद:।

King : Then let the debate commence.

देवी : यदि मां पृच्छसि एतयोर्विवाद एव मे न रोचते।

Queen : If you ask me, I don't at all like the debate between both of these.

गणदास: : देवि न मां समानविद्यत: परिभवनीयम् अवगन्तुमर्हसि।

Ganadas : Your Ladyship, you should not consider me likely to be defeated by the one having similar knowledge.

विदूषक: : भवति पश्यामि उरभ्रसंपातम्। किं मुधा वेतनदानेन।

Jester : Your Highness, I (will) watch the collision (fight) of rams. Why pay them salary for nothing?

देवी : ननु कलहप्रियोऽसि।

Queen : Indeed you are fond of quarrel.

– From the play **'मालविकाग्निमित्रम्'** written by **'कालिदास'**

# प्रतिदर्श - कृतिपत्रिका

**समयः 3 होरात्रयम्।** **एकूण गुणः 80**

**प्रथमः विभागः – गद्यम्।**

**(अवबोधनम्, शब्दसम्पत्तिः, पृथक्करणम्)**

**प्रश्न 1.अ. गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

**अ 1. अवबोधनम्। (केऽपि 2 कृती कुरुत)** **[1]**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।
सैबेरियादेशतः क्रौञ्चाः आगच्छन्ति। यतः _______.
तत्र वसन्तर्तुः अस्ति। / तत्र शीतर्तुः अस्ति।

ii. पूर्णवाक्येन उत्तरं लिखत।
कः पक्षिविशेषः नामशेषतां गतः? **[1]**

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।
केवलदेवराष्ट्रीयोद्यानं प्राणिनामभयारण्यम्। **[1]**

एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकारकाणि स्थलानि अत्र निर्मितानि। स्थलपक्षिणां शुष्का वनस्थली जलविहागार्थं जलस्थली, आनूपं वा स्थलमपि च वृक्षखगानामधिवासभूताः महावृक्षाः अपि अत्र विद्यन्ते। नैकाः सारङ्गागाराः विविधवर्णैः खगैः आवासार्थमङ्गीकृताः अत्र। वृक्षपक्षिणः जलपक्षिणः अपि च तृणपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति। तेषां त्रिशतषट्षष्टिमिताश्च प्रजातयः सुखेन वसन्ति क्रीडन्ति च। तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते। वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि हरन्ति। विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति। जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते। श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते। अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति। सैबेरियादेशात् आगच्छन्तः शीतर्तौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि। लद्दाखप्रान्तादपि नैके खगा आगत्य हिमसमये वसन्ति। एतेषु स्थलान्तरितान् खगान् द्रष्टुं तेषां विषये अधिकं ज्ञातुं पर्यटकाः तथा अभ्यासकाः बहुसंख्यया अत्र आगच्छन्ति देशविदेशेभ्यः। तेषामध्ययनार्थं वलयाङ्कनमपि कृतं वर्तते पक्षिमित्रैः।

**अ 2. अवबोधनम्। (काः अपि 3 कृतीः कुरुत।)**

i. रिक्तस्थानपूर्तिं कुरुत। **[1]**
1. अन्येऽपि = _______ + _______ । (अन्यः + अपि / अन्ये + अपि / अन्या + पि)
2. पक्षिणोऽत्र = _______ + _______ । (पक्षिणः + अत्र / पक्षिणे + अत्र / पक्षिणा + अत्र)

ii. समूहेतरं पदं चिनुत। **[1]**
1. चेतांसि, मनांसि, स्रोतांसि। 2. आवासः, सहवासः, निवासः।

iii. मञ्जूषातः उचितं विशेषणं चित्वा मेलनं कुरुत। **[1]**

| विशेषणम् | विशेष्यम् |
|---|---|
| _______ | महावृक्षाः। |
| _______ | खगान्। |

(आगच्छन्तः, खगानामधिवासभूताः, गवेषमाणाः, स्थलान्तरितान्)

iv. गद्यांशे आगते हेत्वर्थक-धातुसाधित-अव्यये _______, _______ । **[1]**

**अ 3. स्वमत-अभिव्यक्तिः।** **[2]**

भवतां परिसरे पक्षिसंरक्षणं कथं कर्तव्यम् इति विषये 30/40 शब्दैः माध्यमभाषया लिखत।

**प्रश्न 1.ब. गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

**ब 1. अवबोधनम्। (केऽपि 2 कृती कुरुत)** **[1]**

i. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

_______ स्वामी पलायितुमारभत।

(कठिनोऽयं प्रसङ्गःइति मत्वा / व्यायामः आवश्यकः इति मत्वा)

ii. कः कं वदति? **[1]**

'निर्भयतया तान् वानरान् अभिमुखो भव।'

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। **[1]**

वानराः याचकं पीडयन्ति।

भारतभ्रमणसमये एकदा स्वामी विवेकानन्दमहोदयः वाराणसीं प्राप। तत्र अन्नपूर्णायाः मन्दिरं गत्वा प्रणम्य च स तां स्मरन् निवर्तमानः मार्गे किमपि विस्मयजनकमन्वभवत्। मार्गस्य एकतः आसीत् कश्चन तडागः अपरतः च उन्नता भित्तिका। तेन मार्गेण गच्छता स्वामिना ज्ञातं यत् केचन वानराः तस्य पृष्ठतः अनुगच्छन्तीति। यदा स्वामी तिष्ठति तदा तेऽपि वानराः तिष्ठन्ति। यदा स चलति तदा वानराः तमनुगच्छन्तीति ज्ञातं स्वामिना।

तान् मार्गाद् दूरीकर्तुं स्वामिना पदप्रहारस्याभिनयः कृतः तदा ते दंष्टुमधावन्। कठिनोऽयं प्रसङ्गः इति मत्वा भीतः सः त्वरया पलायितुमारभत। वानरा अपि तम् अन्वधावन्। संभ्रान्तं स्वामिनं पलायमानं दृष्ट्वा मार्गे आसीनः कोऽपि याचकः उच्चैरभाषत, 'अरे संन्यासिन्, अलं पलायनेन। निर्भयतया तान् वानरान् अभिमुखो भव। तेन ते वानराः भीताः न त्वां पीडयिष्यन्ति।'
तदाकर्ण्य निश्चयं कृत्वा स्वामी निश्चलः अभिमुखः जातः तेन ते भीताः वानराः दूरं पलायिताः।

**ब 2. शब्दज्ञानम्। (काः अपि 3 कृतीः कुरुत।)**

i. सन्धिविग्रहं कुरुत।

तदाकर्ण्य = _______ + _______ । **[1]**

ii. विलोमशब्दौ चिनुत। **[1]**

पृष्ठतः - _______ । (पुरतः, समीपतः, उभयतः)

अभिमुखः - _______ । (सम्मुखः, पराङ्मुखः, अधोमुखः)

iii. गद्यांशे आगते विशेषणे लिखत। **[1]**

याचकः _______ । भित्तिका _______ ।

iv. गद्यांशे आगते द्वे पूर्वकालवाचकधातुसाधितत्वान्त-अव्यये। **[1]**

_______ |, _______ ।

ब 3. पृथक्करणम्।

यथाक्रमं घटनां लिखत। **[2]**

i. वानराणाम् अनुधावनम्।

ii. आपदः निराकरणम्।

iii. मन्दिरदर्शनम्।

iv. याचकद्वारा उद्बोधनम्।

**क. संवादांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

**क.1. अवबोधनम्। (केऽपि 2 कृती कुरुत।)**

i. उचितं पर्याय चित्वा वाक्यं पुनर्लिखत। **[1]**

अर्वाचीन महाराष्ट्रस्य भाग्यरेषा अस्ति _______ ।

(कोराडी-औष्णिकी ऊर्जाप्रकल्पः, कोयना-जलविद्युत्प्रकल्पः)

निसर्गात् प्राप्त ऊर्जा नाम _______ ऊर्जा।

(अपारम्परिकी / पारम्परिकी)

ii. पूर्णवाक्येन उत्तरं लिखत। **[1]**

गद्यांशे उल्लिखितानि महाभूतानि लिखत।

iii. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।

सौर-ऊर्जा अपारम्परिकी ऊर्जा। **[1]**

| | | |
|---|---|---|
| श्रेया | – | निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति। |
| पार्थः | – | सूर्यः, पवनः, जलमित्येतानि महाभूतानि। एतानि अपारम्परिकानि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि। गोमयात्, पर्णावशेषाद्, अवकारच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते। अणुभ्योऽपि ऊर्जा लभ्यते। |
| श्रेया | – | तथापि एतेषु सौरं स्रोतः अपरिमितम् अक्षयं, प्रदूषणमुक्तं च। कोराडी इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारापुरस्थौ द्वौ अणुविद्युत्-प्रकल्पौ प्रसिद्धौ।कोयना-जल-विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव। |

**क 2. शब्दज्ञानम्।** **(काः अपि 3 कृतीः कुरुत।)**

i. चतुर्थपदं लिखत। **[1]**

अणुभ्योऽपि = अणुभ्यः + अपिः: अवकाराच्च = _______ + _______।

ii. पर्यायशब्दः। **[1]**

भानुः, वायुः इत्यर्थे गद्यांशे योजितौ शब्दौ लिखत।

iii. रिक्तस्थाने द्वे विशेषणे लिखत। **[1]**

_______, _______सौरं स्रोतः।

iv. गद्यांशे आगते षष्ठ्यन्तपदे _______, _______। **[1]**

**क 3. पृथक्करणम्।**

महाराष्ट्रे विद्यमानान् ऊर्जाप्रकल्पान् जालरेखाचित्रे लिखत।




**द्वितीयः: विभागः – पद्यम्।**

**(पृथक्करणं, स्पष्टकरणं, शब्दसम्पत्तिः, अन्वयपूर्ति, स्मरणं, वृत्तज्ञानम्।)**

**प्रश्न 2.अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

**अ 1. पृथक्करणम्।**

मञ्जूषातः उचितान् शब्दान् चित्वा उचित स्तम्भे लिखत। **[2]**

| शक्यम् | अशक्यम् |
|---|---|
| | |
| | |

(सिकताभिः सेतुबन्धनम्, अध्ययनेन विद्याप्राप्तिः, फलके चित्ररेखाटनम्, व्योम्नि चित्रकल्पना)

निर्बन्धपृष्टः स च तं शक्रोऽवादीत् द्विजाकृतिः।
सेतुं बध्नामि गङ्गायां ताराय प्राणिनामिति।।1।।
ततोऽब्रवीत् तपोदत्तः सेतुः किं मूर्ख बध्यते।
गङ्गायामोघहार्याभिः सिकताभिः कदाचन।।२।।
तच्छुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक्।
यद्यैवं वेत्सि तद् विद्यां विना पाठं विना श्रुतम् ।।3।।
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्यतः।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना।।4।।

अ.2. स्पष्टीकरणम्।

'शशविषाणेच्छा' अस्याः कल्पनायाः स्पष्टीकरणं माध्यमभाषया लिखत। **[2]**

**प्रश्न 2. ब. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

१. कदर्थितस्यापि हि धैर्यवृते -
न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव।।

२. सदा सद्ग्रन्थानां श्रवणमनने ये विदधते
नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः।
भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां
स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते सुकृतिनः।।

ब.1. शब्दज्ञानम्।

i. विलोमशब्दौ लिखत। **[1]**

अधोमुखः - ________। कदाचित् - ________।

ii. द्वे विशेषणे लिखत। सुकृतिनः - ________, ________। **[1]**

ब. 2. पद्यांशं पठित्वा रिक्तस्थानानि पूरयित्वा प्रथमश्लोकस्य अन्वयं पुनर्लिखत। **[2]**

कदर्थितस्यापि धैर्यवृतेः ________ प्रमार्ष्टुम् ________ शक्यते। अधोमुखस्यापि कृतस्य वह्नेः ________ कदाचिदेव ________ न यान्ति।

**प्रश्न 2. क. अधोदत्तेषु सुभाषितेषु द्वे सुभाषिते शुद्धे पूर्णे च लिखत।** **[4]**

१. यस्य न ________ बृहस्पतिः।।
२. यथा छायातपौ ________ तरम्।।
३. अणुपूर्वं ________ कुरु।।

**प्रश्न 2. ड. वृत्तनाम चिनुत।** **[1]**

गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम्।
रत्नेषु सर्वेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः।।

अस्य श्लोकस्य वृत्तनाम ________ इति।

(इन्द्रवज्रा / उपेन्द्रवज्रा / गीतिः)

## तृतीयः विभागः – स्थूलवाचनम्।
## (गद्यम् – अवबोधनम्, पृथक्करणम्।)

**प्रश्न 3. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

अ. अवबोधनम्।

i. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत। रङ्गव्यतिकरैः चित्रस्य शोभा न वर्धते। **[1]**

ii. एकपदेन उत्तरं लिखत। भावानां चित्रणं कथं कर्तव्यम्? **[1]**

चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यं च आविष्कृतं भवति। श्वेतः, रक्तः, पीतः, कृष्ण;, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः। द्वित्राणां सम्मिश्रणेन अवान्तरवर्णानां सङ्ख्या अगणिता वर्तते। परं संमिश्रणार्थं श्यामगौरवर्णौ अतीव महत्त्वपूर्णौ। रङ्गव्यतिकरैः चित्रस्य शोभा वर्धते। परमस्मिन् विषये चित्रकारस्य कल्पकता एव आवश्यकी।
चित्रसूत्रविवरणसमये मार्कण्डेयमुनिना आयामोच्छ्रायमानवर्णनं कृतम्। चित्रे स्त्रीपुरुषयोः दैर्घ्यम्, उद्गतता तथा च शरीरस्य अङ्गप्रत्यङ्गम् इत्येतेषां चित्रसूत्रम् इति संज्ञा। इदं सर्वं प्रमाणितं भवेत्। यतो हि परिमाणेन विना चित्रमाकर्षकं न भवति। अपि च काव्यशास्त्रे ये शृङ्गारवीरकरुणादयः नवरसाः वर्णिताः ते एव चित्रे प्रकटिताः भवेयु। रसानां चित्रणंचित्रे चैतन्यं निर्माति। अङ्गविभङ्गैः हृदयस्य भावाः प्रकटिताः भवन्ति। भावानां चित्रणं नवरसानुकूलं कर्तव्यम्। भावयुक्तं चित्रं प्रभावकारि भवति।

ब. पृथक्करणम्।

मञ्जूषातः 4 उचितान् शब्दान् चित्वा स्तम्भपूरणं कुरुत। **[2]**

| प्रधानवर्णौ | संमिश्रणार्थं महत्त्वपूर्णौ वर्णौ |
|---|---|
| ________ | ________ |
| ________ | ________ |

(हरितः, कषायः, गौरः, कपोतः, पीतः, श्यामः)

## चतुर्थः विभागः – लेखनकौशलम्।

**प्रश्न 4. यथानिर्देशं कृतीः कुरुत।** (केवलं 3 उपप्रश्नाः लेखनीयाः।)

**अ. परिच्छेदपूर्तिः।** **[5]**

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत।**

**अद्यत्वे हॉकीक्रीडा जनानां लोकप्रिया क्रीडा वर्तते। शतमीटरपरिमिते विशाले ________ एकस्मिन् पक्षे एकादश क्रीडकानाम् अपरस्मिन् पक्षे च ________ इतस्ततः धावतां दृश्यम् अतीव मनोहारि। यदा निपुणक्रीडकेन नीयमानः कन्दुकः परपक्षगोले प्रविशति तदा दर्शकाः करतलध्वनिं कुर्वन्तः ________ उत्साहं वर्धयन्ति। यः दलः अधिकान् गोलकान् करोति स विजयी भवति। ________ हॉकीप्रतियोगितानां समाचारान् अनेके जनाः शृण्वन्ति अथ च दूरदर्शनयन्त्रेभ्योऽपि लक्षशःदर्शकाः क्रीडकानां खेलचातुर्यं दृष्ट्वा प्रसीदन्ति। हॉकीक्रीडा भारतीयानां राष्ट्रिया क्रीडा। भारतेन ऑलिम्पिकप्रतियोगितासु स्वर्णपदकं ________ ।**

(लब्धम्, आकाशवाणियन्त्रात्, क्रीडाङ्गणे, विजयिपक्षस्य, एकादशक्रीडकानाम्)

**ब. निबन्धलेखनम्।** **[5]**

**3 पर्यायेषु 1 विषयम् अधिकृत्य 5 वाक्यात्मकं निबन्धं लिखत।**

वृत्तपत्राणि, विजयादशमी, व्यायामस्य महत्त्वम्।

**क. संस्कृतानुवादः।** **[5]**

**8 वाक्येषु 5 वाक्यानां संस्कृतभाषया अनुवादं कुरुत।**

| | | | | | |
|---|---|---|---|---|---|
| i. | ढग पाऊस पाडतात. | i. | Clouds rain. | i. | बादल पानी बरसाते हैं। |
| ii. | समुद्राचे पाणी खारट असते. | ii. | Sea-water is salty. | ii. | सागर का जल नमकीन होता है। |
| iii. | तुझ्या भावाचे नाव सांग. | iii. | Tell your brother's name. | iii. | आपके भाई का नाम बताइए। |
| iv. | हे तुला कोणी सांगितले? | iv. | Who told you this? | iv. | यह तुम्हे किसने बताया? |
| v. | ही फुले आणली आहेत. | v. | These flowers are brought. | v. | ये फूल लाये हैं। |
| vi. | वाघ गवत खात नाही. | vi. | A tiger does not eat grass. | vi. | बाघ घास नहीं खाता है। |
| vii. | तू ती बातमी वाचलीस का? | vii. | Have you read that news? | vii. | तूने वह समाचार पढ़ा क्या? |
| viii. | न्यायाधीशाने अपराध्याला शासन करावे. | viii. | The judge should punish the offender. | viii. | न्यायाधीश महोदय अपराधी को शासन करे। |

**ड. वाक्यरचना।**

**i. धातूनां प्रयोगः - चतुर्षु धातुषु 3 धातून् प्रयुज्य 3 वाक्यानि संस्कृतभाषया लिखत।** **[3]**

1. रुच् 1 आ. प. 2. दा 1 प. प 3. वि + रम् 1 प. प. 4. कथ् 10 उ. प.

**ii. अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु 4 वाक्येषु 2 वाक्ययोः अशुद्धिसंशोधनं कुरुत।** **[2]**

1. तस्मै गणपतिं नमः।
2. महामार्गस्य उभयतः वृक्षाः सन्ति।
3. रोदनाद् अलम्।
4. माता सह बालिका शालां गच्छति।

## पञ्चमः विभागः — व्याकरणम्-उपयोजनकौशलम्।

**प्रश्न 5. यथानिर्देशं कृतीः कुरुत।** (केवलं 5 उपप्रश्नाः लेखनीयाः।)

**अ. क्रियापदरूपैः आवलिपूरणम्।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) **[3]**

**सर्वाणि रूपाणि तृतीयपुरुष-एकवचनस्य लेखनीयानि।**

| धातुः | द्वितीयभविष्यत्कालः | परोक्षभूतकालः | वर्तमानकालः | प्रथमभूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| कृ 8 आ.प. | ________ | चक्रे | ________ | ________ | कुरुताम् | ________ |
| गम् 1 प.प | ________ | ________ | गच्छति | ________ | ________ | गच्छेत् |

**ब. नाम + सर्वनाम्नांरूपैः आवलिपूरणम्।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) **[3]**

| विभक्तिः Case | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी Locative | श्रीमति | _______ | _______ |
| तृतीया Instrumental | _______ | वाग्भ्याम् | _______ |
| चतुर्थी Dative | _______ | _______ | अस्मभ्यम् / नः |
| षष्ठी Genetive | सर्वस्याः | _______ | _______ |

**क. धातुसाधितविशेषणैः कोष्ठकपूर्ति।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) **[3]**

| कर्म. भू. धा. वि., Past Passive Participle | क. वि. धा. वि., Potential Passive Participle | कर्त. भू. धा. वि., Past Active Participle | कर्त. व. का. धा. वि., Present Active Participle |
|---|---|---|---|
| | | | |
| | | | |

(प्राप्ता, आनीतवान्, गन्तव्यः, कृत्यः, भाषमाणः, लिखन्ती, दत्तम्, पीतवती।)

**ड. समासाः।** (8 पर्यायेषु 6 पर्यायाः लेखनीयाः।) **[3]**

**विग्रहवाक्यानां समासनामभिः सह मेलनम्।**

| | | |
|---|---|---|
| i. | सुखं च दुःखं च। | कर्मधारयः। |
| ii. | उल्लासेन सह यथा स्यात् तथा। | नञ् तत्पुरुषः। |
| iii. | शक्तिम् अनुसृत्य। | बहुव्रीहिः। |
| iv. | चिन्तने मग्नः। | प्रादि तत्पुरुषः। |
| v. | न प्रियम्। | इतरेतरद्वन्द्वः। |
| vi. | अम्बरम् एव अङ्गणम्। | सप्तमी तत्पुरुषः। |
| vii. | विशेषेण ख्यातः। | अव्ययीभावः। |
| viii. | नीलः कण्ठः यस्य सः। | क्रियाविशेषण सह बहुव्रीहिः। |

**इ. वाक्यपरिवर्तनम्।** (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) **[3]**

i. मया चीवरम् उपयोजितम्। (प्रयोगपरिवर्तनं कुरुत।) (Change the voice.)

ii. नष्टे कारणे कुतः कार्योत्पत्तिः। (यदि - तर्हि उपयुज्य वाक्यं पुनर्लिखत।)
(Use यदि- - तर्हि and rewrite the sentence.)

iii. राष्ट्रध्वजः मां कीर्तिकथाः स्मारयति। (कर्तृस्थाने अहम् उपयुज्य वाक्यं पुनर्लिखत।)
(Rewrite the sentence using अहम् as the subject.)

iv. भवान् सत्त्वरम् उपचारं करोतु। (भवान् इत्यस्य स्थाने त्वम् उपयुज्य वाक्यं पुनर्लिखत।)
(Rewrite the sentence using त्वम् in place of भवान्)

**फ. सङ्ख्यावाचकाः। रिक्तस्थानपूर्तिः।** (4 पर्यायेषु 3 पर्यायाः लेखनीयाः।) **[3]**

i. नवरात्रं नाम _______ रात्रीणां समाहारः। (9)

ii. पाण्डवेषु अर्जुनः _______। (3रा) (3rd)

iii. _______ पुराणानि प्रसिद्धानि। (18)

iv. पितामही दिनस्य _______ भोजनं करोति। (एकदा once)

## षष्ठः विभागः – अनुवादकौशलम्।

**प्रश्न 6. यथानिर्देशं कृतीः कुरुत ।**

**अ. संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।** **[4]**

राइट्बन्ध्वोः प्रयोगाद् अष्टवर्षपूर्वं भारद्वाजमुनिना लिखितस्य 'यन्त्रसर्वस्वम्' नाम्नः ग्रन्थाधारेण शिवकर-बापूजी-तळपदेनाम्ना केनचिद् वैज्ञानिकेन गिरगावसमुद्रतटे सफलतया विमान-उड्डान-प्रयोगः कृतः। प्रयोगसमये बॅ. जयकरः, महाराजः सयाजिराय-गायकवाडः इत्यादयः मान्यवराःउपस्थिताः। दुर्दैवेन एषा महत्त्वपूर्णा घटना दुर्लक्षित जाता। तळपदेमहोदयेन विमानस्य इन्धनत्वेन रसः (mercury) तथा सूर्यशक्तिः (solar energy) उपयोजिते। सम्प्रति नासा (NASA) संस्थापि तस्याः अवकाशयानानां कृते तदेव इन्धनम् उपयोजयति।

**ब. संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **[4]**

इक्षोरग्रात्क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत्सज्जनमैत्री विपरीतानां तु विपरीता ।।1।।
शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः ।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरः स च पण्डितः ।।2।।

**क. संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** **[4]**

**राजा** - तेन हि प्रस्तूयतां विवादः ।
**देवी** - यदि मां पृच्छसि एतयोर्विवाद एव मे न रोचते।
**गणदासः** - देवि, न मां समानविद्यतः परिभवनीयम् अवगन्तुमर्हसि ।
**विदूषकः** - भवति, पश्यामि उरभ्रसंपातम्। किं मुधा वेतनदानेन ?
**देवी** - ननु कलहप्रियोऽसि।

---

| विभागाः | विकल्परहितम् | सविकल्पम् |
|---|---|---|
| **गद्यम्** | 21 | 27 |
| **पद्यम्** | 13 | 15 |
| **स्थूलवाचनम्** | 04 | 04 |
| **लेखनम्** | 15 | 20 |
| **व्याकरणम्** | 15 | 18 |
| **अपठितम्** | 12 | 12 |
| **एकत्रिताः गुणाः** | 80 | 96 |

### संविधान तक्ता

| विभागानुसारि गुणविभाजनम् | | उद्दिष्टानुसारि गुणविभाजनम् | | प्रकारानुसारि गुणविभाजनम् | |
|---|---|---|---|---|---|
| गद्यम् | 21 | ज्ञानम् | 10 | वस्तुनिष्ठ | 37 |
| पद्यम् | 13 | आकलनम् | 09 | लघूत्तरी | 17 |
| स्थूलवाचनम् | 04 | उपयोजनम् | 31 | दीर्घोत्तरी | 26 |
| लेखनम् | 15 | कौशलम् | 30 | | **80** |
| व्याकरणम् | 15 | | **80** | | |
| अपठितम् | 12 | | | | |
| | **80** | | | | |